मीमांसाकरदीपिका

विद्वान् ॥ विघ्नेश्वरभट्टः



यज्ञवेदिप्रतिष्ठानम्
मैसूरु
दूरवाणी ९४४९६७७८६३

मीमांसाकरदीपिका

विद्वान् ॥ विघ्नेश्वरभट्टः
नेलेमाव्
बागिनकट्टा

यज्ञवेदिप्रतिष्ठानम्
मैसूरु
दूरवाणी ९४४९६७७८६३

प्रकाशकः :– यज्ञवेदिप्रतिष्ठानम्
मैसूरु
दूरवाणी :– ९४४९६७७८६३


मुद्रकः :– विघ्नेशग्राफिक्स्
मैसूरु
दूरवाणी :–९८४४२६६९९४

वर्षम् :– २०१३

पार्श्वसंख्याः :– २५ + ८४ =१०९

प्रतयः :– १०००
मौल्यम् :– १००/–

लेखकः :– विद्वान् ॥ विघ्नेश्वरभटः
बागिनकट्टा
नेलेमाव्



पा. नं :-
श्री शा. ग. शक १९२
संवत्

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य पदवाक्यप्रमाण पारावारपारीण यमनियमासन प्राणायामप्रत्याहारध्यानधारण
समाध्यष्टाङ्गयोगानुष्ठाननिष्ठ षण्मतव्यवस्थापनाचार्य तपश्चक्रवर्त्यनाद्यविच्छिन्न श्रीश्रीमज्जगद्गुरु शङ्कराचार्यशिष्य
श्री भास्करेन्द्र सरस्वती करकमलसञ्जात श्री श्रीमत् विश्ववन्द्य सरस्वती गुरुपरम्पराप्राप्त सकलनिगमागमसारहृदय सांख्यत्रयप्रतिपादक
क्रमागतश्रौतस्मार्तकर्ममार्गव्यवस्थापक अशेषत्रय्यन्ताद्यद्वैतसिध्दान्तप्रबन्धप्रवर्तक आदिराजधानी विद्यानगर महाराजधानी
श्रीमत् सुधापुरवरसिंहासनाधीश्वर सर्वतन्त्रस्वतन्त्र व्याख्यान सिंहासनाधिष्ठित राजाधिराजदेशिक गोकर्णमण्डलाधीश
सह्याद्रि पुरवराधीश्वर शाल्मली तीरवास श्रीमल्लक्ष्मीनृसिंह चन्द्रमौळिपदपङ्केरुहरसग्रासाळिवन्मानस
श्री ललिताचरणदास श्रीमत् सोदा स्वर्णवल्ली महासंस्थनाधीश्वर
श्री श्रीमत्सर्वज्ञेन्द्र सरस्वती श्रीस्वामिकरकमलसञ्जात

33/13-14/8 **श्री श्रीमद् गङ्गाधरेन्द्र सरस्वती श्रीस्वामिभिः ।** 23/05/2013-

प्रियशिष्यस्य चिरजीविनः भट्टोपाह्वस्य विघ्नेश्वरस्य विषये कृता : श्रीमन्नारायणस्मृतयः।

'धर्मो विश्वस्य जगतः प्रतिष्ठा' इत्याह भगवानाम्नायः । धर्मस्तावद्द्विविधः प्रवृत्तिरूपः निवृत्तिरूपश्चेति । स च धर्मः जैवे प्रपञ्चेऽस्मिन् जातमात्रेण मानुषेण यथावर्णं यथाश्रमं च अवश्यं परिपालनीयः । नाविदितं मतिमतामिदं यत्–शास्त्रसमादिष्टेन पथा परिपालितः धर्मः इहपरयोः श्रेयसे भवति, अन्यथा हि सर्वथा प्रत्यवाय इति । एतद्विज्ञायैव अव्याजकरुणासरस्वान् भगवान् जैमिनिराचार्यः श्रुत्यर्थप्रतिपत्तिमार्गस्य निष्कण्टकीकरणाय पूर्वमीमांसासूत्राणि

प्रणिनाय । सूत्राणाञ्चैतेषां यथावदर्थवैशद्यसम्पत्तये भाष्यवृत्तिवार्तिकादिरूपाणि साधनानि प्रदत्तानि प्राचीनैर्महर्षिकल्पैराचार्यैः । परन्त्वद्यत्वे मोहान्धतमसावृतदृष्टयः जनाः तान्यपि यथावदवगन्तुं न पारयन्तीति धर्ममीमांसाशास्त्रमहोदधेः सारसुधां समुद्धृत्य संयोज्य च निबन्धरूपेण समर्पयितुं योग्यो अयमवसरः इत्यत्र नास्ति सन्देहः ।

तथा च विदुषा चिरजीविना विघ्नेश्वर भट्टेन सरलया भाषया मीमांसातन्त्रस्थाः अध्यायाः निरूपिताः , एवं अध्यायस्थाः प्रधानविषयाः परामृष्टाः , अपि च तत्तत्सम्बद्धानि उदाहरणानि प्रदर्शितानीति अतः गहनं मीमांसाशास्त्रवनं प्रविविक्षूणां समेषां इयं निश्चयेन 'करदीपिका भवति' इति सन्तोषावहो विषयः ।

इत्थं च अयं ग्रन्थः बालानां छात्राणां पूर्वमीमांसाशास्त्राध्ययनोत्साहं जनयतु । अनेन ग्रन्थकर्तुः शास्त्रनिष्ठापि विवर्धताम् । तेन शास्त्रपरम्परा इतोप्यतिशयेन अभिवर्धताम् । विघ्नेश्वरभट्टस्य तद्विताभिलाषिणश्च आयुरारोग्यभाग्यानि श्रीशारदाम्बाचन्द्रमौळीश्वरसहितः श्री लक्ष्मीनृसिंहः अनुगृण्हातु इत्याशास्महे ॥

श्री लक्ष्मीनृसिंहः अनुगृण्हातु इत्याशास्महे॥

दिनाङ्कः – १५–०५–२०१३।

स्थलम् – स्वर्णवल्ली.

श्री ... दा स्वर्णवल्ली महासंस्थानम्,

॥ श्रीः ॥

मीमांसाशास्त्रज्ञानं कष्टेन संपादनीयं भवति । तत्राऽपि मीमांसाशास्त्रमधिकृत्य ग्रन्थलेखनं नाम कष्टतरमेव भवति । अनेन विघ्नेश्वरभट्टेन मीमांसाशास्त्रमधिकृत्य मीमांसाकरदीपिकानामकः ग्रन्थः लिखितः । मया अयं ग्रन्थः पठितः । अस्मिन् ग्रन्थे मीमांसाशास्त्रप्रतिपाद्याः सर्वेऽपि विषयाः प्रतिपादिताः । ये मीमांसाशास्त्रम् अधीताः , ये अध्येतारः तेषां सर्वेषामयं ग्रन्थः उपयोगाय भवति । अयं विघ्नेश्वरभट्टः इतोप्यतिशयेन मीमांसाशास्त्रे ग्रन्थान् प्रकटयतु । अस्य शास्त्रज्ञानम् अभिवर्धतामिति अहमाशासे ।

प्रोफेसर् ॥ विद्वान् ॥ नारायण अडिगः

पूर्वमीमांसा प्राध्यापकः

श्रीमन्महाराजसंस्कृतमहापाठशाला

मैसूरु

***

विशुद्धविज्ञानघनस्वरूपं विज्ञानविश्राणनबद्धदीक्षम् ।
दयानिधिं देहभृतां शरण्यं देवं हयग्रीवमहं प्रपद्ये ॥

विदितमेव समेषां विदुषां ग्रन्थनिर्माणं बहुकष्टमिति । तत्रापि मीमांसा बहुविज्ञेया इत्युक्तदिशा मीमांसाविषये ग्रन्थरचना दुश्शका एव । मीमांसाविषये सत्स्वपि अनेकप्रकरणग्रन्थेषु ग्रन्थोऽयं जनानां मीमांसाध्ययने महदुपयोगाय कल्पते । क्वचित् प्रकरणग्रन्थे ये विषयाः प्रतिपादिताः तान् अतिक्रम्य अयं ग्रन्थः चकासते । अस्मिन् ग्रन्थे निरूपणाशैली सुमधुरा सुललिता च वर्तते । ग्रन्थेस्मिन् अन्यूनानतिरेकेण शास्त्रमनतिरिच्य विषयप्रस्तुतिः दरीदृश्यते ।

अस्ति कापि किंवदन्ती कोषाध्ययनेन संस्कृतज्ञो भवति इति । तद्वत् ग्रन्थाध्ययनेन मीमांसको भवत्येव इत्यत्र नास्ति संशयलेशोऽपि । ग्रन्थकर्त्रा विदुषा विघ्नेश्वरेण बहुप्रयासेन अयं ग्रन्थः व्यरचि । अनेन बालविदुषा इतोऽपि ग्रन्थप्रकाशनं लोकोपयोगाय शास्त्रोपयोगाय च भगवदनुग्रहेण भूयादिति अहमाशासे ।

विद्वान् ॥ डा ॥ चक्रवर्तिरामचन्द्रन्
मीमांसासहप्राध्यापकः
महाराजसंस्कृतमहापाठशाला, मैसूरु

***

मीमांसाकरदीपिका

शास्त्रं भेषजं रोगरूपस्य संशयस्य । यथा औषधज्ञानं न रोगोपशामकं , किन्तु ज्ञातौषधानां सेवनं , तथा परमं शास्त्रं वेदः । वेदोदितकर्मानुष्ठानं हितमातनोति । वैदिकगम्यं तद्रहस्यम् । तद्रहस्योद्घाटकं च पूर्वमीमांसाशास्त्रम् । कर्मकर्तृद्रव्यवैगुण्यं निवार्य तत्र साद्गुण्योपसम्पादनेन कर्मसाफल्योद्दीपकं मीमांसाशास्त्रम् । किन्तु मीमांसान्तरंगम् अवगन्तुं कः उपायः इति चिन्तयतः मीमांसाकरं मीमांसाशास्त्रं भाष्यवार्तिकवृत्तिरूपैः व्याख्यानोपव्याख्यानैः अर्थप्रकाशनं कृतवन्तः सुधियः । तामिमां सरणिम् अनुसरन् मीमांसकः चिरञ्जीवी विघ्नेश्वर भट्टः इमां मीमांसाकरदीपिकां वाचककरगतां चिकीर्षति ।

इयं च मीमांसायाः आकरस्य द्वादशाध्यायस्य प्रतिपाद्यस्य विषयस्य सूक्ष्मतया परिचायकत्वात् आकरदीपिका । तत्र तत्र उद्धृतपरममूलस्य वेदस्य , विवरणवाक्यस्य च मूलभूताकारावेदकत्वाच्च । अपि च इयं करदीपिका । यथा हितेन मितेन च प्रकाशेन करदीपिका अन्वेषणीयवस्तुनः अन्वेषणे प्रयोजिका , तथा उद्दिष्टविषयग्रहणोपायत्वात् इयं करदीपिका । अस्यां मीमांसाकरदीपिकायां विघ्नेश्वर भट्टः सरलया भाषया मीमांसाप्रतिपाद्यान् विषयान् यथाक्रमं निबध्नाति । प्रत्यध्यायं व्यवस्थितमर्यादया अन्तर्विभागं कुरुते ।

अध्यायप्रकरणादिसङ्गतिम् उल्लिखति । एवं शास्त्रीयनिरूपणतन्त्रम् अनुसरति । अन्ते परिशिष्टेन मीमांस्यानां प्रमेयाणां स्वरूपं विमृशति । मीमांसाप्रवर्तकानाम् आचार्याणाम् इतिवृत्तं विवृणोति ।

इत्थं मीमांसाकरदीपिकेयं कुमारविघ्नेश्वरभट्टनिरूपिता मीमांसावजिगमिषूणां न केवलं करदीपिका अपि तु आकरदीपिकापि । इमां दीपिकाम् अवलम्ब्य मीमांसाशास्त्रगर्भगतान् गहनान् विषयान् अनायासेन अवगन्तुं शक्यते । उत्साहिनः सततोद्यमशालिनः तेजस्विनः कुमारस्य विघ्नेश्वरभट्टस्य अयं शास्त्रानुरागः चिरं विवर्धताम् । तत्फलं लोकः समश्नुतामित्याशास्ते अयं जनः ।

विद्वान् ॥ गङ्गाधर वि भट्टः
नव्यन्यायसहप्राध्यापकः
श्रीमन्महाराजसंस्कृतमहापाठशाला
मैसूरु

***

नमो धर्माय महते

सुखान्वेषणे मग्नाः भवन्ति सर्वे प्राणिनः। तत्रापि मानवाः ज्ञानशीला इति प्रसिद्धाः । मानवः स्वेष्टसिद्धये सन्मार्गं अन्विष्यति । सन्ति सुखप्रापकानि अनेकानि कर्माणि परं तानि शास्त्रबोधितानि उत नेति विवेचना युक्ता । धर्मजन्यानि वा उत अधर्मजन्यानि वा सुखप्रदायकानि भवन्ति चेत् अलम् इति न कदाचिदपि चिन्तनीयो विषयः । सुखं न कदाचिदपि बलवत्तरदुःखसंसृष्टं भवेत् । अधर्मायत्तं महाद्दुःखायैव भवति इत्यत्र नास्ति काचित्संशीतिः । लोके तावदधर्ममार्गेण सम्पादितसुखानां इदानीन्तनं दुःखं वयमवगच्छामः । तद्यथा शत्रुनिवारणेन सुखं भविष्यति इति धिया हतशत्रुः कारागृहे निवसति आजीवनं दुःखमनुभवति च । किमर्थं सुखसम्पादनाय कृतेन कर्मणा दुःखप्राप्तिरितिचेत् गृहीताधर्ममार्ग इति तस्योत्तरं भवति ।

अतः विज्ञायते धर्ममार्गेण सुखं सम्पादनीयमिति । तर्हि अपेक्षितं धर्माऽधर्मज्ञानम् । कथं वा अस्य सम्पादनम् ? कथं वा तस्यानुष्ठानम्? किं वा अस्याधिष्ठानम् ? कथं वा अस्य निर्णयः? इत्यादयः प्रश्नाः साधारणा एव । तत्रोत्तरविवक्षवः शास्त्रमधिगच्छन्ति वेदम् अन्विषन्ति च । कस्मिन् ज्ञाते सर्वेषामुत्तरं लभ्येत इति चेत् समस्तः वेद एव

स्मृतिपथमलङ्करोति । कदाचित् भूखननं, लोहान्वेषणं , तैलान्वेषणं सुशकं स्यात् । परं श्रुत्यर्थज्ञानं दुःशकमेव इत्यत्र नास्ति संशयलेशः । तस्मात् तस्य विज्ञानायैव अनेकानि शास्त्राणि प्रवृत्तानि विराजन्ते । धर्मविबोधनाय चतुर्दशविद्यास्थानानि प्रथितानि । तत्र वेदचतुष्टयमपि अन्तर्भूतम् । अन्यद्दशकं वेदचतुष्टयज्ञानाय अवकल्पते । श्रूयते च याज्ञवल्क्ये–

पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥
(याज्ञ.स्मृ.१.३)

अत्रोपस्थितेषु विना मीमांसाम् अन्यानि प्रत्यक्षां श्रुतिं न विचारयन्ति । अपि तु तत्र तत्र श्रुतिम् उदाहरन्ति । परंतु मीमांसा आसमन्तात् वेदं विवेचयति । "मीमांसा" इत्युक्ते काऽसौ कर्ममीमांसा उत ब्रम्हमीमांसा इति सञ्जायते संशयः। यदि वेदम् अनुक्रमम् अध्येष्यामस्तदा कर्ममीमांसा एव प्रथमतः उपस्थीयते । तस्मात् परं ब्रम्हमीमांसायाः उपस्थितिः। मीमांसां विना कथं वा यज्ञप्रक्रियाः आतिष्ठेरन् ? अत एव वेदे श्रूयते "मीमांसां चक्रे" (तै.आ.१) इति । तस्मादेव विज्ञायते न नूतना इयं मीमांसा इति । मीमांसा नाम वाक्यार्थविचारः । " मान पूजायामम् " (पाधा.पा.१८४३) इत्यस्मात् धातोः जिज्ञांसार्थकसन् प्रत्यये सति उत्पन्नोऽयं मीमांसा शब्दः । अत

एव विचारं ब्रूते । अस्ति काचित् प्रसिद्धिः मीमांसाप्रवर्तकः जैमिनिरिति । सः प्रवर्तकः न तु मीमांसाकर्ता । जैमिनेः प्रागपि इयं मीमांसा आसीदिति केषुचित् ग्रंथेषु श्रूयते । तद्यथा "ब्रम्हा प्रजापतये मीमांसां प्रोवाच सोऽप्यग्नये सोऽपि इन्द्राय स च वसिष्ठाय सोऽपि पराशराय पराशरः कृष्णद्वैपायनाय सोऽपि जैमिनये स्वोपदेशादनन्तरम् अमुं न्यायं सूत्ररूपेण निबद्धवानिति" सिद्धान्तचन्द्रिकायां श्रूयते ।

धर्मप्रतिपिपादयिषुणा अधर्मनुनुत्सुना महर्षिणा जैमिनिना सूत्रजालमीमांसा प्रत्यपादीति अविवादः । अतश्च मीमांसा प्रवर्तकः जैमिनिरिति आमनन्ति । वेदवाक्यानां विज्ञानाय पुनरनेके नियमाः स्वकीये शास्त्रे जैमिनिना उपस्थापिताः । श्रुत्यर्थावगतये ये नियमाः अपेक्षितास्ते सर्वे महर्षिणा समुपस्थापिताः । शास्त्रेऽस्मिन् सन्ति द्वादश अध्यायाः । अतोऽस्य शास्त्रस्य अस्ति नामधेयान्तरं "द्वादशलक्षणी" इति । द्वादशसु अध्यायेषु प्रतिपाद्यो विषयः धर्मः । लौकिकवाक्यानामपि चिन्तनमस्मिन् सङ्गतम् । प्रत्यध्याये विभिन्नो विषयः विचारितः। अस्य सूत्रजालस्य शबरस्वामिनः भाष्यसौकर्यम् अध्ययनेच्छाम् उन्मुखीकरोति । कुमारिलभट्टानां श्लोकवार्तिकं , तन्त्रवार्तिकं , टुप्टीका च अध्ययनेच्छां द्विगुणीकरोति । पार्थसारथिमिश्राणां शास्त्रदीपिकायां कृत्स्नं जैमीनीयसूत्रं विचारितम् वर्तते । खण्डदेवाचार्यैः भाट्टदीपिका

विरचिता वर्तते । एवम् अनेकेषां तत्वज्ञानां विवेचकानां च व्याख्या मीमांसाशास्त्रे उपलभ्यते । अध्यायविभागे हेतुः कः? इति जिज्ञासायां धर्मावगमने अपेक्षितानि साधनानि तद्भेदबोधके हेतवः भवन्ति । प्राथम्ये अध्यायविभागः एवं श्रूयते ।

धर्मो द्वादशलक्षण्या व्युत्पाद्यस्तत्रलक्षणैः ।
प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकः ॥
अधिकारोऽतिदेशश्च सामान्येन विशेषतः ।
ऊहो बाधश्च तन्त्रञ्च प्रसङ्गश्चोदिताः क्रमात् ॥

(जैन्यावि १.१.६,७)

धर्मः द्वादशलक्षणैः व्युत्पादितः । "विना प्रमाणं प्रमा नोपगच्छति" अतः धर्मे प्रमाणं विचारितं प्रथमाध्याये । द्वितीये षट्कर्मभेदबोधकप्रमाणैः कर्मणां भेदः प्रतिपाद्यते । तृतीये शेषी शेषेण निष्पद्यते , अर्थात् फलदायकः भवति इति धिया शेषत्वं निरूपितम् । तद्बोधकानि षट् प्रमाणानि च तत्रैव निरूपितानि । चतुर्थे क्रतूपकारकाणां क्रत्वर्थानां तथा पुरुषार्थानां परस्परभेदान् अवबोध्य तौ निरूपितौ। पञ्चमे पूर्वापरभावरूपः क्रमः सुचिन्तितः । षष्ठे फलभोक्ता कः ? कस्य अधिकारः? इत्यादीनां निरूपितत्वात् सोऽधिकाराध्यायः। सप्तमे सामान्यातिदेशः विकृत्युपयोगितया विचिन्तितः । स एवाष्टमे विशेषेण विचारितः । नवमे प्रकृतौ अन्यथादृष्टस्य

विकृतौ अन्यथाभावत्वेन ऊहः सुचिन्तितः । दशमे प्रकृतिसम्बन्धिनः पदार्थस्य विकृत्यङ्गत्वग्राहक– प्रमाणा–भावरूपः बाधः विचारितः । एकादशे सकृदनुष्ठाने बहूनाम् उपकुर्वाणं तन्त्रं प्रतिपादितम् । द्वादशे अन्योद्देशेन कृतेन अन्यस्य उपकारकः प्रसङ्गः विचारितः । इत्थं द्वादशसु अध्यायेषु धर्मज्ञानोपकारकाणि प्रमाणानि प्रतिपादितानि । सर्वत्र साधकबाधकानि धर्मे निरूपितानि । एकस्मिन् अध्याये चत्वारः पादाः वर्तन्ते । तृतीये, षष्ठे, दशमे च अष्टौ पादाः विराजन्ते । एते शरभाध्यायाः इति प्रसिद्धाः । आहत्य षष्टिपादाः सन्त्यस्मिन् । अधिकरणरूपेण विचारः शास्त्रेऽस्मिन् प्रसिद्धः । अधिकरणलक्षणं श्रूयते यथा–

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
प्रयोजनं सङ्गतिश्चैव प्राञ्चोऽधिकरणं विदुः ॥

(भा.दी.भू.१)

विषयो नाम विवादाध्यासितं किञ्चित् वेदवाक्यम् । विशयः इत्युक्ते सन्देहः इत्यर्थः । पूर्वपक्षः सिद्धान्तप्रतिवादी भवति । उत्तरस्तु सिद्धान्तपक्षः। सङ्गतिर्नाम निरूपितविषयेण सह निरूपणीयविषयस्य सम्बन्धः । फलं स्वकीयं भिन्नञ्च भवति । इत्थञ्च विषयवाक्ये सन्देहः तत्र पक्षद्वयस्य जिज्ञासा । ततः परम् उभयत्र फलम् इति अधिकरणस्वरूपं ज्ञेयम् । आहत्य मीमांसाशास्त्रे अष्टशतोत्तरम् एकपञ्चाशत्

(८५१) अधिकरणानि प्रसिद्धानि । तथा च अत्र विद्यमानानां जैमिनीयसूत्रसङ्ख्या पञ्चविंशत्युत्तरसप्तविंशतिशतानि (२७२५) इति ज्ञेया । महदिदं शास्त्रं वेदविज्ञानायैव नास्तिकबुद्धिविनाशाय प्रवृत्तम् । तदेवं वार्तिककारेण निरूपितम् –

प्रायेणैव हि मीमांसा लोके लोकायतीकृता ।
तामास्तिकपथे नेतुमयं यत्नः कृतो मया ॥
(श्लो.वा १.१.१.१०)

अस्ति कश्चन नियमः स च एवं श्रूयते –

ज्ञातार्थं ज्ञानसम्बन्धं श्रोतुं श्रोता प्रवर्तते ।
ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥ इति ॥

तथा च श्रूयते–

अधिकारी च सम्बन्धो विषयश्च प्रयोजनम् ।
ग्रन्थादौ एव वक्तव्यम् अनुबन्धचतुष्टयम् ॥ इति ॥

विषयप्रयोजनाधिकारीसम्बन्धात्मकं अनुबन्धचतुष्टयं शास्त्रादौ निरूपणीयम् इति शिष्टमर्यादा । तत्तु प्रथमसूत्रेणैव प्रसङ्गात् ज्ञायते । श्रूयते च वार्तिके–

अथातो धर्मजिज्ञासा सूत्रमाद्यमिदं कृतम् ।
धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम् ॥
(श्लो.वा.१.१.१.११)

अथ शब्दस्य आनन्तर्यमर्थः । कस्मादनन्तरमिति जिज्ञासायां स्वाध्यायविधिप्राप्ताध्ययनमाक्षिप्यते । अनेन बुध्यते अध्ययनानन्तरमिति । अनेन अधीतवेदः अधिकारी शास्त्रेऽस्मिन्निति विज्ञेयम् । विषयः धर्मः । प्रतिपाद्यप्रतिपादकभावसम्बन्धः शास्त्रधर्मयोः भवति । प्रयोजनं धर्मज्ञानम् । ननु क्लेशेन प्राप्तेन वाक्यार्थज्ञानेन किं वा प्रयोजनमितिचेत्, प्राप्तज्ञानेन अनुष्ठितेन कर्मणा स्वर्गादीनि फलानि लभ्यन्ते । तदेव परमोद्देशः मानवानाम् । वयन्तु लौकिकाः अल्पमतयः । स्वर्गादिकं फलं भवेच्चेत् यागादयः अनुष्ठेयाः इत्यभ्युपगच्छामः । स्वर्गादयः यागसमनन्तरमेव नोपलभ्यन्ते । देशान्तरे वा देहान्तरे वा कालान्तरे वा लभ्यन्ते । तत्रापि संशयः स्यात् । परन्तु वेदबोधितानि कर्माणि संशययोग्यानि भवितुं नार्हन्ति । बाधकज्ञानाभावात् स्वतः प्रमाणत्वाच्च वेदः परमं प्रमाणम् । अस्तु वा कल्पसूत्रेणैव कर्मज्ञानं भवति । अनेकाः स्मृतयः वर्तन्ते । तादृशैरेव कर्मज्ञानं सुस्पष्टं भवति । किं पुनः मीमांसया प्रयोजनमितिचेत् । न । व्याकरणेन शब्दार्थज्ञानं भवति । नास्ति संशयः । कल्पेन प्रयोगज्ञानं भवति । नास्ति तत्रापि संशीतिः । निरुक्तेन विशेषपदार्थोऽपि बुध्यते नास्ति तत्रापि सन्देहलेशः । परन्तु सन्ति अवस्थान्तराणि । स यथा "अक्ताः शर्कराः उपदधाति" (तै.ब्रा.३.१२.५.१२) इत्यादिषु स्थानेषु अन्यैः

शास्त्रैः दुश्शकोऽर्थनिर्णयः । अङ्गाङ्गीज्ञानं वा कर्मज्ञानं वा नान्येन शास्त्रेण लभ्यते । तावद्भिः वेदैरपि कर्मज्ञानं भवति किल ? इति चेत् वेदेनाधिगतेन क्रमेण अग्निहोत्रानन्तरं ओदनपाकः लभ्यते । स तु अनुपयोगी । अतः कर्मानुष्ठाने मीमांसा अपेक्षिता भवति ।

" व्यवहारे भाट्टनयः" इति उक्तिरपि प्रसिद्धा । इदं लौकिकज्ञानावबोधकमपि भवति । मीमांसान्यायाः स्मार्तकर्मणि तान्त्रिककर्मण्यपि प्रयोजकाः । सर्वाणि शास्त्राणि आनुषङ्गिकतया धर्मं बोधयन्ति धर्मलक्षणं प्रतिपादयन्ति च । परं मीमांसाशास्त्रं साक्षात् धर्मं धर्मानुष्ठानमपि प्रतिपादयति । मीमांसाशास्त्रसिद्धान्तः अन्येभ्यः शास्त्रेभ्यः भिन्नः । मीमांसकाः षट् प्रमाणानि अङ्गीकुर्वन्ति । तार्किकाः चत्वारि । साङ्ख्याः प्रमाणत्रयम् । चार्वाकाः प्रमाणमेकम् अभ्युपगच्छन्ति । स्वशास्त्रे प्रतिपाद्यमानविषयोपयोगितया प्रमाणादीनां चिन्तनं प्रवर्तते । शाब्दबोधे वैयाकरणाः धात्वर्थमुख्यविशेष्यतां प्रतिपादयन्ति । तार्किकाः प्रायः प्रथमान्तार्थस्य मुख्यविशेष्यताम् अङ्गीकुर्वन्ति । मीमांसकाः प्रत्ययार्थभावनायाः मुख्यत्वं सिद्धान्तयन्ति । एवं मीमांसाशास्त्रं वेदविचाराय प्रवृत्तम् । वेदान्तः ब्रह्मतत्वज्ञानाय । न्यायः पदार्थविवेचनाय । व्याकरणं शब्दानां साधुत्वप्रतिपादनाय प्रवृत्तम् । सर्वेषाम् उद्देश्यं भिन्नं भिन्नम् एव वरीवर्तते ।

अतस्तेषां प्रतिपादनावसरे भिन्नत्वमेव दरीदृश्यते । बहुषु स्थलेषु शास्त्रेषु विरोधः विद्योतते । परन्तु तादृशावसरे शास्त्रमर्यादया जिज्ञासा युक्ता भवति । सर्वेषां शास्त्राणां नैकमत्यं सदा भवत्येव । उद्देश्यस्य विभिन्नत्वात्। अतः कर्मविबोधनमार्गे नान्यत् शास्त्रं विद्यते मीमांसां विना । वेद एव परमं प्रमाणम् इति अङ्गीकुर्वाणाः मीमांसकाः तन्मूलकतया एव स्मृत्यादीनां प्रामाण्यम् अभ्युपगच्छन्तः कर्मणां प्राशस्त्यदुन्दुभिं दिगन्तरालकुहरे ताडं ताडमापूरयन्ति । अत एव इदं वेदविज्ञानशास्त्रं सर्वैरपि आदरणीयम् । ग्रथोऽयं मया शास्त्रर्णापाकरणाय व्यरचि ।

रामकृष्णनागवेणीनाम्नोः पुत्रत्वेन बागिनकट्टा इति नाम्ना प्रसिद्धे ग्रामे प्राप्तजन्माऽहम उमच्चिगिस्थायां श्रीमातापाठशालायां वर्षपञ्चकं यावत् सुशिक्षितोऽस्मि । " पुराणमेकं नृषु कर्म कारणम् " इत्युक्तदिशा पूर्वकृतपुण्यवशेनैव श्रीमन्ममहाराजसंस्कृतमहाविद्यालयं आप्तोऽहं तत्रस्थैः गुरुजनैः अनुगृहीतोऽस्मि । तत्रापि अज्ञमपि शिष्यत्वेन स्वीकृत्य अनुगृहितौ पूज्यस्थानीयौ गुरू नारायणरामचन्द्रमहाभागौ । अस्मिन्श्च लेखने लेखनिस्थानीयोऽहमित्येव भावयामि । मया यल्लिखिताः शास्त्रीयाः पङ्क्तयः ताः सर्वाः गुरुवरयोः मुखात् श्रुता एव । यदि दोषोऽस्त्यस्मिन् स च स्वकरणगतदोषात् जात इति भावनीयः । अयञ्च ग्रन्थः शास्त्रर्णापाकरणाय मया व्यरचि ।

ग्रन्थेऽस्मिन् विद्यमानदोषान् परिमार्जयन्तः मार्गं दर्शितवन्तः अस्माकं श्रीमन्महारजसंस्कृतमहापाठशालायाः नव्यन्याय – शास्त्रसहप्राध्यापकाः विद्वांसः वि.गङ्गाधरभट्टमहाभागाः एवं कलाशालायाः अल्ङ्कारशास्त्रसहप्राध्यापकाः विद्वांसः एन् . आर् . मुरुळीधरमहाभागाः । अस्माकं कलाशालायाः गुरुजनाः प्रोत्साहेन ममोत्साहं संवर्धितवन्तः तेषां कृपादृष्ट्या कृतकृत्योऽहमित्येव भावयामि ।

ग्रन्थस्यास्य प्रकाशनेऽपेक्षितार्थव्यवस्थां प्रकल्पयन्तः श्रीमन्महाराजसंस्कृतमहापाठशालायाः प्राचार्याः छात्रहित – चिन्तकाः राज्योत्सवाद्यनेकपुरस्कारैः सम्मानिताः विद्वांसः डा ॥ प्रो ॥ भाष्यंस्वामिनः , सदासंस्कृतसेवायै बद्धकटयः सदासंस्कृतछात्रोत्साहसंवर्धनकार्यतत्पराः श्रीमन्तः वि.टि. अवधानिनः , उद्यमिनः सदासत्कार्यनिरताः देशविदेशेषु मानिताः श्रीमन्तः वसन्तराव् महाभागाः , संस्कृतानुरागिणः उद्यमिनः श्रीमन्तः श्रीनिवास . वि . भट्टमहाभागाश्च मां सार्थकं कृतवन्तः । एवं ये प्रत्यक्षेण परोक्षेण च मां सहकृतवन्तः तान् सर्वान् अभिवन्दे ।

विद्वान् ॥ विघ्नेश्वर भट्टः
नेलेमाव्
बागिनकट्टा

***

ग्रन्थप्रकाशने आर्थिकमहादानिनां नामानि

प्रो ॥ डा ॥ भाष्यं स्वामिनः
प्राचार्याः श्रीमन्महाराजामहापाठशाला
मैसूरु

श्रीमन्तः वि . टि . अवधानिनः
निवृत्ततन्त्रज्ञाः
नञ्जनगूडु

श्रीमन्तः वसन्तराव् महाभागाः
उद्यमिनः
बेङ्गळूरु

श्रीमन्तः श्रीनिवास . वि . भट्टाः
उद्यमिनः
मैसूरु

।। मीमांसाशास्त्रस्वरूपम् ।।



सोमकीर्तिसमाभासं मीमांसाशास्त्रमुत्तमम्।
अक्षसूत्रं दधद्दक्षे सुधापूर्णघटं परे।।

॥ विषयानुक्रमणिका ॥

****

॥ मीमांसाकरदीपिका ॥

॥ प्रथमः प्रमाणाध्यायः ॥

मङ्गलाचरणम्

॥ ॐ ॥

॥ नमो धर्माय महते ॥

विद्यागणपतिं वन्दे स्वमातापितरौ तथा ।
धर्मार्थज्ञानदं शास्त्रं नमामि ज्ञानसिद्धये ॥
गुरून्नारायणान् वन्दे रामचन्द्रान् तथैव च ।
शब्दार्थसदृशान् पूज्यान् शब्दार्थज्ञानसिद्धये ॥

इह खलु धर्माधर्मविवेकिना भगवता जैमिनिमहर्षिणा पूर्वमीमांसायां द्वादशलक्षणी प्रादर्शि । सा च द्वादशलक्षणी धर्माधर्मोपयोगितया "अथातो धर्मजिज्ञासा"(जै.सू.१.१.१) इत्यारभ्य "अन्वाहार्ये च दर्शनात्" (जै.सू.१२.४.४१) इत्यन्तैः उपत्रिसहस्रसूत्रैः प्रमाणभेदशेषप्रयुक्तिक्रमाधिकार – सामान्यविशेषातिदेशोहबाधतन्त्रप्रसङ्गाश्चेति द्वादशाध्यायेषु उपबृंहिता । तस्य प्रयोजनं प्रत्यपादि वार्तिककारेण । तद्यथा–

अथातो धर्मजिज्ञासा सूत्रमाद्यमिदं कृतम् ।
धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम् ॥
(श्लो.वा.१.१.१.११)

स्वाध्यायविधिविचारः

शास्त्रस्यास्य मूलं वेदवाक्यमेव । अत एव वेदवाक्यविचिन्तकं शास्त्रमिदमारम्भणीयम् उत नेति विचारायैव "स्वाध्यायोऽध्ये-तव्यः" (तै.आ.२.१५) इति अनारभ्याधीतविधिः विचार्यते । विधिरयं स्वपरम्पराप्राप्तशाखाध्ययनं विधत्ते । न केवलं गुरुमुखोच्चारणानुसार्युच्चारणम् अध्ययनमिति वाच्यम् । अपि तु अक्षरग्रहणादिपरम्परोपजायमानवाक्यार्थज्ञानार्थम् अध्ययनं विधीयते । ननु विधिरयं कर्तृकालफलेभ्यः रहितः । अत एव किञ्चित् फलं कल्पनीयम् ।

विनापि विधिना ज्ञानलाभान्न हि तदर्थता ।
कल्प्यस्तु विधिसामर्थ्यात्स्वर्गो विश्वजिदादिवत् ॥

(शा.दी.१.१)

साङ्गवेदाध्ययनेनैव अर्थज्ञानस्य प्राप्तेः न पुनः अर्थज्ञानोद्देशेन विचार्यो वेदः । "व्रीहीनवहन्ति" इत्यत्र यथा अवघातेनैव तुषविमोकं भावयेदिति नियमोऽङ्गीक्रियते, तथात्र नियमोऽपि न सम्भवति । अनारभ्याधीतत्वात् अक्रत्वर्थत्वाच्च । अत "वेदमधीत्य स्नायात्" (बौधा.गृ.२.५.३) इति स्मृतिबलेन अक्षरग्रहणरूपाऽध्ययने प्राप्ते गुरुगृहात् समावर्तितव्यम् । न तु गुरुगृहे एव उषित्वा वेदवाक्यानि मीमांसितव्यानि । इति प्राप्ते-लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना ।
विधेश्च नियमार्थत्वात् नानर्थक्यं भविष्यति ॥ (शा.दी.१.१)

अध्ययनस्य अर्थज्ञानमेव फलम् । अधीतैरेव वेदैरवगतानि कर्माणि फलदानीति नियमोऽपि भाव्यः। "वसन्ते ब्राह्मणम् उपनयीतेत्यादि"(आप.ध.१.१.१.१९) वाक्यप्राप्तोपनीत त्रैवर्णिका एव अस्मिन् अधिकारिणः । उपनीतानां कार्याकांक्षा, स्वाध्यायविधेः कर्त्राकांक्षेति उभयाकांक्षायाः सत्वात् । साङ्गाध्ययनेन प्राप्तार्थज्ञानेन कर्मानुष्ठानं दुःशकमेव । सन्देहादीनां सम्भवात् । अत एव अर्थज्ञानाय विचार्यो वेदः । विचारो नाम "सन्दिग्धे वस्तुनि प्रमाणेन तत्वपरीक्षा" (वाच.विका.वि) । स च विचारः गुरुं विना न सम्भवतीत्यतः तत्कालिकस्नानस्मृतेः बाध एवेति ज्ञेयः । तथा च गुरोरेव धर्मज्ञानाय वेदवाक्यानि मीमांसितव्यानि इति सिध्यति ।

धर्मलक्षणविचारः

तत्रोदेति प्रश्नः कोऽयं धर्मः? किं तस्य लक्षणं ? केन निष्पन्नोऽयम्? कथं वा अनुष्ठेयः? इति । अत्राभिधीयते । यागादिरेव धर्मः । स च वेदप्रतिपाद्यः प्रयोजनवदर्थः । न च एतावल्लक्षणेन स्मृत्यादीनाम् अप्रामाण्यप्रसङ्गः । शाखान्त-रोपस्थितानां वेदवाक्यानां विज्ञानायैव तेषाम् उपबृम्हितत्वात् तन्मूलकतया प्रामाण्यस्य अङ्गीक्रियमाणत्वाच्च ।
"मानाधीना मेयसिद्धिः मानसिद्धिश्च लक्षणादिति" (जै.न्या.१.१.२.९) न्यायानुरोधेन लक्षणम् उल्लिलेख जैमिनिरपि । "चोदनालक्षणोऽर्थो धर्मः "(जै.सू.१.१.२) इति ।

"चोदना हि क्रियायाः प्रवर्तकं वचनमाहुः" (शा.भा.१.१.२) इति भाष्यम् । "चोदनाचोपदेशश्च विधिश्चैकार्थवाचिनः" (श्लो.वा.१.१.५.११) इति वार्तिकम् । इत्येतादृशवाक्यालोचनया चोदना नाम विधायकं प्रवर्तकं वा वाक्यमिति सिध्यति । अर्थशब्दः अभ्युदयवाचकः । श्येनादीनां फलानाम् अभ्युदयत्वाभावेऽपि श्येनादियागानां न धर्मत्वे विघातः । वेदेन विहितत्वात् । अपि तु तामसत्वं कुत्रचिदभ्युपगम्यते ।

प्रमाणलक्षणम्

"यद्यस्य लक्षणं भवति तदेव तद्बोधकं प्रमाणमपि भवति" इति न्यायेन चोदना एव धर्मे प्रमाणमपि भवति । तदेवं निरूपितं वार्तिककारेण–

द्वयमेकेन सूत्रेण श्रुत्यर्थाभ्यां निरूप्यते ।
स्वरूपेऽपि हि तस्योक्ते प्रमाणं कथ्यतेऽर्थतः ॥
(श्लो.वा.१.१.२.२)

"कारणदोषबाधकज्ञानरहितम् अगृहीतग्राहिज्ञानम्" इति (शा.दी.१.१.५) प्रमाणलक्षणम् । वार्तिककारेण प्रमाणलक्षणम् इत्थं न्यरूपि –

तस्मात् दृढं यदुत्पन्नं नापि संवादमृच्छति ।
ज्ञानान्तरेण विज्ञानं तत् प्रमाणं प्रतीयताम् ॥
(श्लो.वा.१.१.२.८०)

प्रभाकरस्तु "अनुभूतिः प्रमाणमिति " (बृ.टि१.१.२) अन्यथैव प्रमाणलक्षणं प्रतिपादयति ।

स्वतः प्रामाण्यवादः

प्रमाणविषये नैकमत्यं वरीवर्ति। तत्र चतस्रः विप्रतिपत्तयः समुपजृम्भन्ते । प्रामाण्यमप्रामाण्यं च उभयं स्वतः इति सांख्याः। उभयमपि परत इति तार्किकाः । प्रामाण्यं परतः अप्रामाण्यं स्वत इति बौद्धाः । तुरीयः पक्षस्तावत् प्रामाण्यं स्वतः , अप्रामाण्यं परत इति । प्रामाण्याप्रामाण्ययोः स्वतस्त्वे युगपदेकस्मिन् विषयिणि तथात्वमतथात्वञ्च सम्भवति । उभयोः स्वतस्त्वे निस्वभावात्मकं ज्ञानं सिध्यति । प्रामाण्यस्य परतस्त्वे अप्रामाण्यस्य च स्वतस्त्वे अनवस्थादोषसम्भवः । अतः स्वतः प्रामाण्यपक्ष एव आश्रयणीयः , लाघवात् । अप्रामाण्यन्तु कारणदोषबाधकज्ञानजन्यम् इति राद्धान्तः । तच्च षोढा विभक्तम् । प्रत्यक्षानुमानोपमान–शब्दार्थापत्त्यनुपलब्धिभेदात् ।

प्रत्यक्षनिरूपणम्

तत्र प्रथमम् प्रत्यक्षम् ।"तत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्मसत्प्रत्यक्षम्" इति तस्य लक्षणम् । यथा– घटे चक्षुस्संयोगाद् घटज्ञानम् । न केवलम् इन्द्रियार्थसम्प्रयोगजं ज्ञानं प्रत्यक्षम् । तथा सति शुक्तौ रजतरूपभ्रमज्ञाने

अतिव्याप्तिप्रसङ्गः । यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः स एव असमीचीनः प्रत्ययो नान्यः ।

अनुमाननिरूपणम्

द्वितीयञ्च अनुमानम् । "ज्ञातसम्बन्धस्यैकदेशदर्शनात् एकदेशान्तरे असन्निकृष्टेऽर्थे बुद्धिः"अनुमानम् (शा.भा.१.१.५)। तत्रस्थः ज्ञातसम्बन्धः द्विविधः प्रत्यक्षतो ज्ञातसम्बन्धः सामान्यतो ज्ञातसम्बन्धश्चेति । उभयोः ज्ञातसम्बन्धयोः अन्यतरस्यैकदेशदर्शने अनुमितिरुपजायते । प्रथमं यथा धूमदर्शनादग्निविज्ञानम् । तच्च प्रत्यक्षत एव अग्निधूमयोर्ज्ञा-तसम्बन्धस्य एकदेशस्य धूमस्य दर्शनादुत्पन्नम् । द्वितीयः यथा देवदत्तस्य गतिपूर्विकां देशान्तरप्राप्तिमुपलभ्य चन्द्रादीनां गतिः । गमनेन देशान्तरप्राप्तिः भवति इति देवदत्तादीनां गमनेन सामान्यतः विज्ञातम् । चन्द्रादीनां अस्मद्भिन्नाधिकरणस्थानां देशान्तरप्राप्तिरूपैकदेशदर्शनात् गमनमनुमीयते ।

उपमाननिरूपणम्

"उपमानमपि सादृश्यम् असन्निकृष्टेऽर्थे बुद्धिमुत्पादयति" (शा.भा.१.१.५) । सादृश्यं नाम "तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्वम् " यथा गोभिन्नत्वे सति गोगतशृङ्गित्वादि-भूयोधर्मवत्वं गवये वर्तत इति हेतोः "गोसदृशः गवय " इति प्रयोगः । "अर्थान्तरयोगिभिः सम्बन्धिसामान्यैः अर्थान्तरस्य तादृशयोगः सादृश्यम्" (शा.दी.१.१.५) । यथा गोजातीयादिभिः

कर्णाद्यवयवसामान्यैः गवयजातेर्योगो गवयस्य गोसादृश्यं गवयसंयोगिभिश्च गोर्योगः तत्सादृश्यम् ।

शब्दनिरूपणम्

"शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानम्" (शा.भा.१.१.५)। विज्ञाताच्छब्दात् पदार्थाभिधानद्वारेण यद्वाक्यार्थविज्ञानं तच्छाब्दं नाम प्रमाणम् (शा.दी.१.१.५) । अयं च शब्दः नित्य एव । स च द्वेधा विभक्तः पौरुषेयोऽपौरुषेयश्चेति । पौरुषेयः लौकिकः प्रसिद्ध एव । अपौरुषेयः वेदः । "यजेत स्वर्गकामः" (तां.ब्रा.१६.१५.५) इत्यादौ असन्निकृष्टयोः यागस्वर्गयोः विज्ञानं वेद्यम् ।

अर्थापत्तिनिरूपणम्

"अर्थापत्तिरपि दृष्टः श्रुतो वा अर्थोऽन्यथा नोपपद्यत इत्यर्थकल्पना"(शा.भा.१.१.५) । "प्रमितस्यार्थस्य अर्थान्तरेण विना अनुपपत्तिमालोच्य तदुपपत्तये या अर्थान्तरकल्पना सा अर्थापत्तिः (शा.दी.१.१.५)। पीनो देवदत्तः दिवा न भुङ्क्ते इत्यत्र पीनत्वम् अतिभोजनं विना नैवसम्भवतीति कृत्वा प्रमितपीनत्वसिद्धये रात्रिभोजनं कल्प्यते ।

अनुपलब्धिनिरूपणम्

अभावसिद्धये अनुपलब्धिरपि प्रमाणत्वेन अङ्गीकृता । सा च नास्तीत्यस्य अर्थस्य असन्निकृष्टस्य स्वरूपम् । तया अभावज्ञानं प्रतीयते । भूतले घटो नास्ति इत्यत्र असन्निकृष्टस्य

3

घटस्य अभावरूपं ज्ञानं घटानुपलब्ध्या गृह्यते । अत एव अभावज्ञानकरणत्वेन अनुपलब्धिरपि अङ्गीकृता । इत्थं च सिद्धानि षट् प्रमाणानि ।

शब्दनित्यत्वविचारः

ननु शब्दः नित्य इति प्रतिपादितम् । उच्चरितः शब्दः प्रध्वस्तः, शब्दं कुरु , मा शब्दं कार्षीः इत्यादिप्रयोगदर्शनात् शब्दस्य अनित्यत्वम् एव विज्ञायते किल । तथा च युगपदनेकत्र श्रूयमाणस्य शब्दस्य कथं वा नित्यत्वं सम्भवेत्? शब्दे वृद्धिः ह्रासोऽपि दृश्यते । नित्ये सति तदसम्भवः । अत एव अनित्यः शब्द इति चेन्न । शब्दं करोत्वित्यादयः प्रयोगाः शब्दाभिव्यञ्जकवायुपराः । कण्ठताल्वाद्यभिघातेन प्रेरिताः वायवः कर्णदेशमागत्य कर्णशष्कुल्यवच्छिन्नाकाशे पूर्वमेव यथावदवस्थितान् वर्णानभिव्यञ्जयन्ति । अतः शब्दो नोत्पद्यते । अपि तु अभिव्यज्यते । एकोऽपि आदित्यः बहुभिः यथा गृह्यते तद्वत् शब्दोऽपि । उच्चारयितृबाहुल्याल्पत्वाभ्याम् शब्दे महत्वाल्पत्वप्रतीतिः नैव भवति । अपि तु नादे महत्वाल्पत्वप्रतीतिः जायते । अत एव शब्दस्य नित्यत्वम् एव बोध्यम् ।

वेदापौरुषेयत्वविचारः

धर्मजिज्ञासूनां परमं प्रमाणं वेदः । स च अपौरुषेयः । ननु "बबरः प्रावाहणिरकामयत " (तै.सं.७.१.१०) , "कुसुरुबिन्दु रौद्धानकिरकामयत" (तै.सं.७.२.२) इत्यादि वाक्यैश्च काठकादि समाख्यया च पौरुषेयत्वं सिध्यति इति चेत् न । तत्सर्वं श्रुतिसामान्यमात्रम् । बबरादयः न पुरुषविशेषाः। अपितु श्रुति सामान्या एव । तथा च

वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम् ।
वेदाध्ययनसामान्यात् अधुनाध्ययनं यथा ॥
(श्लो.वा.१.१.२४.३६६)

इत्यादिना अध्ययनाध्यापननियमेन दृढकर्तृस्मरणाभावाच्च वेदस्य अपौरुषेयत्वं सिध्यति ।

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।
शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः ॥

इत्यादिभिश्च अपौरुषेयत्वं वेदस्य वेद्यम् ।

अष्टौ प्रमाणानि

तथा च धर्मे अष्टौ प्रमाणानि मीमांसकैरभ्युपगतानि । तानि च विध्यर्थवादमन्त्रनामधेयस्मृत्याचारवाक्यशेषसामर्थ्याख्यानि । ननु वेदः परमं प्रमाणमिति प्रतिपादिते श्रुत्यन्तर्गतानां विध्यर्थवादमन्त्रादीनां सिध्यति किल प्रामाण्यमिति चेत ।

सत्यम् । सिध्यत्यपि कथं वा प्रामाण्यम् इत्युदेत्याकांक्षा । तन्निवारणाय पुनश्चिन्त्यतेऽत्र । वार्तिके च–

धर्मे प्रमीयमाणे तु वेदेन करणात्मना ।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति ॥

अत एव मीमांसायां विभज्य विचार्यते वेदः।

विधिप्रभेदाः

तत्र प्रथमः विधिः । स च अज्ञातार्थज्ञापकः वेदभागः । अप्रवृत्तस्य प्रवर्तकवेदभागो वा । स च अग्निहोत्रं जुहोतीत्याद्यात्मकः । स च अनेकविधः । उत्पत्तिविधिः, विनियोगविधिः, अधिकारविधिः, प्रयोगविधिश्चेति ।

उत्पत्तिविधिः

अज्ञातकर्मणः स्वरूपमात्रबोधको विधिरुत्पत्तिविधिः । यथा "अग्निहोत्रं जुहोतीति"(तै.ब्रा.२.१.२.८) । अत्र अग्निहोत्रहोमः केवलं कर्तव्यतया विधीयते । अतोऽयम् उत्पत्तिविधिः ।

विनियोगविधिः

अङ्गप्रधानयोः सम्बन्धोपस्थापको विधिः विनियोगविधिः । यथा "दध्ना जुहोतीति" (मै.सं.४.७.७) । अत्र प्राप्ते अग्निहोत्रहोमे दधि करणत्वेनान्वेति । अत्र अङ्गप्रधान–सम्बन्धस्तावत् तृतीयया उपस्थाप्यते। अतोऽयं विनियोगविधिः ।

अधिकारविधिः

फलस्वाम्यबोधको विधिरधिकारविधिः । स च "ज्योतिष्टोमेन स्वर्गकामो यजेत" (आप.श्रौ.१०.२.१) इत्यादिरूपः । विधिनानेन फलसम्बन्धः विधीयते । यः फलं कामयमानः यागमनुतिष्ठति स एव तद्यागजन्यफलस्य अधिकारी भवति । तद्बोधकोऽयम् अधिकारविधिः ।

प्रयोगविधिः

प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः । स च अङ्गविधिभिः एकीकृतस्सन् कर्माङ्गेषु अव्यवधानं प्रतिपादयन् उत्तरोत्तरकर्तव्यतां निबोधयन् अविलम्बापरपर्यायं प्रयोगप्राशुभावं विधत्ते । अयञ्च विभिन्नवाक्यैः प्रतिपादितैः अङ्गविधिभिः एकवाक्यतया महावाक्यतामापन्नस्सन् सर्वा–ङ्गविशिष्टप्रधानप्रयोगविधायक इत्यतः प्रयोगविधिरित्युच्यते। "सद्यो दीक्षयति, सद्यः सोमं क्रीणाति" (तै.सं १.८.१८) "सोमम् अभिषुणोति" (तै.ब्रा.१.४.७.४) , "सोमं पावयति" (मै.सं.४.५.५) इत्याद्यङ्गवाक्यैः अवगतैः दीक्षाक्रयाभि–षवपवनाद्यङ्गैः उपकृतस्य ज्योतिष्टोमस्य फलसाधनत्वं प्रतिपादयत्ययं विधिः । "ज्योतिष्टोमेन स्वर्गकामो यजेत "(आप.श्रौ.१०.२.१) इत्यत्र साङ्गः ज्योतिष्टोमयागः फलोद्देशेन विधीयते अतोऽयं प्रयोगविधिः । ननु विधिरयम् अधिकारविधित्वेनाङ्गीकृतः कथं पुनरस्य प्रयोगविधित्वं इति

चेदुच्यते । "स्वर्गकामो यजेत" इत्यत्र अधिकारः प्रतीयते । "ज्योतिष्टोमेन " इत्यत्र प्रयोगः प्रतिपाद्यते । अत एव अत्र प्रयोगविधित्वे अविघातः । अन्यथापि विधिविभागः प्रसिद्धः । अपूर्वनियमपरिसङ्ख्याभेदेन ।

विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्ते परिसङ्ख्येति कीर्त्यते ॥

(तं.वा.१.२.६.३२)

अपूर्वविधिनिरूपणम्

अत्यन्ताप्राप्तस्य अर्थस्य प्रापको विधिः अपूर्वविधिः। यथा "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" (तै.सं.२.२.५) इति । अत्र प्राप्तस्य दर्शपूर्णमासयागस्य एतद्विध्यभावे स्वर्गसम्बन्धः कथञ्चिदपि न सिध्यति । अत एव अयमपूर्वविधिः । एवं "व्रीहीन् प्रोक्षतीत्यादावपि"(शत.ब्रा१.३.१.१०) अपूर्वविधित्वं बोध्यम् ।

नियमविधिनिरूपणम्

यो विधिरप्राप्तमर्थं पक्षे नियमयति स नियमविधिः । यथा "व्रीहीनवहन्तीति"(आ.श्रौ.१.२९.७) । वितुषीभावसिद्धये नखविदलनकुट्टनादीनामपि प्राप्तौ अवघातेनैव वैतुष्यं भावयेदिति विधिनानेन नियम्यते । ननु वितुषीकरणकर्मणि एतद्विध्यभावेऽपि नखविदलनादिवत् अवघातस्यापि प्राप्तिः वर्तते

किल इति चेत् सत्यम् । सत्यामपि प्राप्तौ नियता प्राप्तिः नास्ति । अत एवानेन नियमोऽभ्युपगन्तव्यः ।

परिसंख्याविधिनिरूपणम्

अनेकेषां समुच्चित्य युगपत् प्राप्तौ इतरनिवृत्तिफलको विधिः परिसङ्ख्याविधिः । स च श्रौतीलाक्षणिकीभेदाभ्यां द्विविधः । "इमामगृभ्णन् रशनामृतस्य इत्यश्वाभिधानीमादत्ते" (तै.सं.५.१.२) इति श्रौती परिसङ्ख्या । इत्यश्वाभिधानीम् इति श्रुत्या गर्दभरशनायाः व्यावृत्तिसिद्धेः । ननु गर्दभरशना-श्वरशनयोः प्राप्तिः मन्त्रलिङ्गेन भवति । अतस्तत्र तुल्यबलसिद्धौ कथं वा व्यावृत्तिः इति चेदुच्यते । तुल्यबलत्वेऽपि इत्यश्वाभिधानीम् इत्यत्र द्वितीयाश्रुतेः श्रूयमाणत्वत् तया च अश्वरशनाग्रहणं झटिति उपस्थीयमानत्वात् श्रुतिलिङ्गयोः श्रुतेरेव प्राबल्याच्च श्रुत्याप्रतीत अश्वरशनाग्रहणार्थ एव अभ्युपगन्तव्यः। अत एव गर्दभरशनायाः व्यावृत्तिः विज्ञेया । एवं –

"पञ्चपञ्चनखाभक्षाः ब्रह्मक्षत्रेण राघव ।
शल्यकः श्वाविधो गोधा शशः कूर्मश्च पञ्चमः॥"

(वा.रा.४.१७.३४)

इत्यत्र पञ्चपञ्चनखाभक्षाः इति शशादीनां पञ्चानां कीर्तनात् अन्येषां भक्षणं प्रतिषिद्यते । इयं च लाक्षणिकी परिसङ्ख्या इति विज्ञेया । इतरव्यावर्तकस्य पदाभावात् ।

सर्वे उत्पत्तिविधयः अपूर्वविधयः भवन्ति । सर्वे गुणविधयः नियमविधयः भवन्ति । अनेकेषु इतरव्यावर्तकः परिसंख्याविधिः भवति । केषाञ्चिन्मते निषेधोऽपि परिसंख्याविधिरेव भवति ।

अर्थवादानां प्रामाण्यनिरूपणम्

धर्मे द्वितीयं प्रमाणं अर्थवादः । ननु विधेः अज्ञातार्थज्ञापकत्वेन प्रामाण्यं सम्भवति । परं " वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति" (तै.सं.२.१.१), "सोऽरोदीद्यदरोदीत् तद्रुद्रस्य रुद्रत्वम्" (तै.सं.१.५.१) इत्येवञ्जातीयकानाम् अर्थवादवाक्यानां धर्मं प्रति अप्रामाण्यं भूतानुवादात् इति चेन्न । "वायव्यं श्वेतमालभेत भूतिकाम" इति विधिसन्निधौ पठितः अर्थवादः वायुनामकयागः शीघ्रफलदायकः तस्मात् कर्तव्यः इति कर्तव्यताबुद्धिं रेचयति । एवं "बर्हिषि रजतं न देयमिति" निषेध्यांशं सोऽरोदीदिति अर्थवादः निन्दयन् तस्मान्निवृत्तिं निबोधयति । अत एव विध्येकवाक्यतया अस्त्येव प्रामाण्यमर्थवादानामिति प्रत्येतव्यः। विध्येकवाक्यत्वं तावत् पदैकवाक्यत्वेन वा वाक्यैकवाक्यत्वेन वा सम्भवति । "वायुर्वै क्षेपिष्ठा देवता" इत्यत्र पदैकवाक्यत्वेन, "यजमानः प्रस्तरः" इत्यत्र वाक्यैकवाक्यत्वेन विध्येकवाक्यत्वं बोध्यम् ।

स च अर्थवादः त्रिविधः ।

तदेवं वार्तिककारेण वर्णितम्–

विरोधे गुणवादः अनुवादोऽवधारिते ।

भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः॥ इति

(श.द.अ.वि)

"सिंहो माणवकः" इत्यत्र माणवके सिंहाभेदस्य विरोधेन तद्गतदशाभेदो बोध्यते । तेन समर्थत्वादिरूपं तद्वृत्तिगुणं प्रतिपादयति इति गुणवादः । एवं "यजमानः प्रस्तरः" (तै.सं.२.६.५) इत्यत्रापि तथैव बोध्यम । द्वितीयस्तावदनुवादः प्रत्यक्षादिभिरवधारितेऽर्थे तमेवार्थमनुवदतीत्यनुवादः । स यथा "अग्निर्हिमस्य भेषजम् , भूमिरावपनं महत "(तै.सं.७.४.१८) इति । तृतीयः भेदस्तावत भूतार्थवादः । गुणवादानुवादो–भयार्थकत्वाभावात् तथा च तदुभयभिन्नभूतं सिद्धार्थं वदतीति भूतार्थवादः। अयञ्च अनेकविधः। स यथा–

हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।

परकृतिः पुराकल्पो यावधारणकल्पना ॥ इति

(श.द.अ.वि)

"तेन ह्यन्नं क्रियते"(शत.ब्रा.२.५.३.२३) इत्यत्र हेतुः,"यद्विश्वे देवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वं" (तै.ब्रा.१.४.१०.५) इत्यत्र निर्वचनं, "अमेध्या वै माषाः"(तै.सं.५.१.८) इत्यत्र निन्दा, "वायुर्वै क्षेपिष्ठा देवता"(तै.सं.२.१.१) इत्यत्र प्रशंसा , "को हि तद्वेद यदि अमुष्मिन् लोके अस्ति वा न वा"(तै.सं.६.१.१) इत्यत्र संशयः, "यजमानसम्मिता औदुम्बरी

भवति" (तै.सं.६.२.१०) इत्यत्र विधिः, "माषान् मे पचत"(शत.सं.१.१.१०) इत्यत्र परकृतिः, "पुरा ब्राह्मणा अभैषुः"(तै.सं.१.५.१०) इत्यत्र पुराकल्पः , " प्रजापतिर्वरुणायाश्वमनयत् स स्वां देवतामार्च्छत् स पर्यदीर्यत..." (तै.सं.२.३.१२) इत्यत्र यावधारणकल्पनारूपश्चेति भूतार्थवादप्रभेदाः दृश्यन्ते ।

मन्त्राणां प्रामाण्यनिरूपणम्

धर्माधर्मयोः तृतीयं प्रमाणं मन्त्रः । वेदेऽपि "अहे बुध्निय मन्त्रं मे गोपाय" (तै.सं.१.२.१.२३) इति श्रूयते । तदनुरोधेन विचिन्त्यते । यत्र "अभियुक्तानां मन्त्रपदवाच्यत्वप्रकारिकोपस्थितिः विशेष्यतासम्बन्धेन स मन्त्रः" (भा.दी.२.१.८) इति भाट्टदीपिकायां श्रूयते । ननु विधेयांशस्य स्तावकत्वं विधायकत्वं वा मन्त्राणां नैव विद्यते । मन्त्राणां विध्यैकवाक्यत्वासम्भवात् अप्रामाण्यमेव । न च प्रयोगकालिकार्थस्मारकत्वेन प्रामाण्यमिति वाच्यम्। कोशादिद्वारा तत्सम्भवात् । एवं साममन्त्राणाम् अर्थस्मारकत्वमपि अनुपपन्नम् । अत एव अदृष्टार्थाः मन्त्राः इति चेन्न । उपपाद्यते च दृष्टार्थत्वेन प्रामाण्यम् । विधयः प्रयोगात् बहिः प्रवृत्तिं जनयित्वा कृतार्थाः भवन्ति । पुनः प्रयोगकालिकार्थस्मारकत्वेन मन्त्राः उपकुर्वन्ति । अत एव अर्थस्मारकत्वरूपदृष्टप्रयोजनकत्वेनैव मन्त्राणां प्रामाण्यम् उपपादनीयं लाघवात् ।

"मन्त्रैरेव स्मर्तव्यः" इति नियमोऽपि अङ्गीकार्यः। तस्य नियमस्य अदृष्टं कल्प्यते । ऋचां गाने एव साम्नः उपयोगः । ऋचाम् अर्थाभिधानसामर्थ्यात् तत्राऽपि दृष्टार्थत्वेनैव प्रामाण्यम् अवकल्प्यते । कदाचित् अनृक्साम्नः अर्थाभिधानसामर्थ्याभावात् अगत्या अदृष्टं कल्प्यते ।

स्मृतीनां प्रामाण्यनिरूपणम्

मन्वादिस्मृतीनामपि धर्माधर्मयोः वेदमूलकतया प्रामाण्यमङ्गीक्रियते । ननु वेदेनैव धर्माधर्मज्ञानसिद्धौ पुनः स्मृतिप्रणयनं व्यर्थम् । तथा अष्टकादिस्मृतीनां मूलमपि नैव लभ्यते । वेदाध्ययननियमम् अध्येतारः नियमेन पालयन्ति । अतः उत्सन्नत्वमपि नैव सम्भवति । पौरुषेयस्मृतिषु पुरुषगतलोभादयोऽपि दृश्यन्ते । अत एव अप्रमाणं स्मृतिरिति चेन्न । "स्मर्यते वेदधर्मो अनया" इति व्युत्पत्त्या स्मृतिः वेदार्थानुभवजन्यं वेदार्थानुवादकं धर्माधर्मयोश्च प्रमाणं मुनिप्रणीतं वाक्यरूपम् । तथा च वेदमार्गगामिन एव स्मृतिप्रणेतारः।

"श्रुतिस्मृतिद्वियोर्मध्ये श्रुतिरेव गरीयसी ।
श्रुत्या सह विरोधे तु बाध्यते विषयं विना ॥"
(जा.स्मृ.)

यत्र श्रुतिविरुद्धाः स्मृतयः दृश्यन्ते तत्र तासामप्रामाण्यमेव प्रतिपादितवान् भाष्यकारः यावत् विरुद्धस्मृतीनां मूलश्रुतिः

नोपलभ्यते तावत् अननुष्ठानरूपम् अप्रामाण्यं वेद्यमिति वार्तिककारः । इत्थञ्च शिष्टत्रैवर्णिकपरिग्रहात् वेदमूलकतया प्रामाण्यं स्मृतीनामिति सिद्धम्। बोधायनकल्पेऽपि "स्मार्तो द्वितीयः"(बौ.ध.१.१.३) इत्यनेन सूत्रेण स्मृतीनां प्रामाण्यं उपपादितम् ।

आचाराणां प्रामाण्यनिरूपणम्

एवं होलाकाद्याचाराश्च धर्माधर्मयोः प्रमाणानि । न च आचाराणां वाक्यरूपत्वाभावात् मूलकल्पनायाः अशक्यत्वात् अप्रामाण्यं वाच्यम् । यत्र श्रुतिस्मृतिवाक्यानि न सन्ति शिष्टाश्च धर्मबुध्याऽनुतिष्ठन्ति तदपि वैदिकवत् प्रतिपत्तव्यम् । तदेवं बोधायनेन भणितम् "तृतीयः शिष्टागमः"इति (बौ.ध.१.१.४) । यथा विवाहादौ कङ्कणधारणादि माङ्गलिकत्वेन यदनुष्ठीयते तादृशकर्म । तथा च धर्मबुध्या वैदिकैरनुष्ठीयमानत्वात् अप्रामाण्यं वक्तुं नैव शक्यते । तथा च कल्पितमूलत्वेन आचाराणां प्रामण्यं नाङ्गीक्रियते । यत्र श्रुतिविरुद्धः आचारः दृश्यते तस्य अप्रामाण्यमेव ज्ञातव्यम् ।

नामधेयानां प्रामाण्यनिरूपणम्

ननु उद्भिदादिपदानां कथं वा प्रामाण्यं उपपाद्यते?

विध्यर्थवादमन्त्रांशैर्वेदाद्धर्मः प्रतीयते ।
नचोद्भिदादिशब्दानां तेष्वन्तर्भावसम्भवः ॥

अत एव गुणविधित्वेनैव तेषाम् उद्भिदादिपदानां प्रामाण्यम् उपपादनीयमिति प्राप्ते अभिधीयते–"उद्भिदादिपदानां नामधेयत्वेनैव प्रामाण्यमुपपादनीयम्"। तत्र च चत्वारि निमित्तानि प्रसिद्धानि । तानिच मत्वर्थलक्षणभिया , वाक्यभेदभिया , तत्प्रख्यशास्त्रात् , तद्व्यपदेशशास्त्राच्चेति ।

मत्वर्थलक्षणभिया नामधेयनिरूपणम्

"उद्भिदा यजेत पशुकामः"(तां.ब्रा.१९.७.३) इत्यत्र मत्वर्थलक्षणभिया "उद्भित्" पदे नामधेयत्वम् अङ्गीक्रियते । "उद्भिद्यते अनेन"इति व्युत्पत्त्या खनित्रादिगुणवाचकम् उद्भित् पदमिति यदि अङ्गीक्रियते , तदा उद्भिद्वता यागेन इष्टं भावयेत् इति मत्वर्थलक्षणाङ्गीकारेण षष्ठविध्याश्रयणं भवति । तच्च गौरवम् । अत एव उद्भित्पदस्य नामधेयत्वम् अङ्गीक्रियते ।

षड्विधविधिप्रकाराः

यत्र केवलशुद्धधात्वर्थकरणकभावना विधीयते स आद्यः विधिप्रकारः यथा "अग्निहोत्रं जुहोती"(तै.ब्रा.२.१.२.८) इति । यत्र उद्देश्यवाचकपदान्तरसापेक्षत्वं तत्र द्वितीयप्रकारः । यथा "अग्निहोत्रं जुहुयात् स्वर्गकामः"(मै.उ.६.३६) इति । यत्र धात्वर्थाद्देश्येन अन्यकरणकभावनाविधिः स तृतीयप्रकारः । यथा "दध्ना जुहोतीति"(मै.सं.४.७.७) । अन्योद्देशेन अन्यकरणकभावनाविधित्वं तच्चतुर्थः प्रकारः । यथा "दध्नेन्द्रियकामस्य जुहुयात् " (तै.ब्रा.२.१.५.६) । यत्र

गुणविशिष्टधात्वर्थकरणकभावनाविधित्वं सः पञ्चमः प्रकारः। यथा "सोमेन यजेत"(तै.सं.३.२.२) इति। यत्र अन्योद्देशेन गुणविशिष्टधात्वर्थकरणकभावनाविधित्वं सः षष्ठः। यथा" सौर्यं घृते चरुं निर्वपेत् ब्रह्मवर्चसकामः"(तै.सं.२.३.२) इति।

श्रौतव्यापारनानात्वे शब्दानामतिगौरवम्।
एकोक्त्यवसितानां तु नार्थाक्षेपो विरुध्यते॥
(तं.वा.२.३.३)

वाक्यभेदभिया नामधेयनिरूपणम्

एवं "चित्रया यजेत पशुकामः"(तै.सं.२.४.६) इत्यत्र वाक्यभेदभिया नामधेयमङ्गीक्रियते। "पशुना यजेत" (काठ.सं.८.१) इत्यनेन प्राप्तपशूद्देशेन चित्रत्वं स्त्रीत्वं च विधीयते चेत् वाक्यभेदप्रसङ्गः। अत एव "दधि मधु घृतं पयो धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यमित्यत्र"(का.सं.११.२) प्राप्तकर्म चित्रापदेन अनूद्य फलसम्बन्धः विधीयते। अत एव चित्रापदं नामधेयपरम्।

तत्प्रख्यशास्त्रात् नामधेयनिरूपणम्

ननु "अग्निहोत्रं जुहोति" इत्यत्र "अग्नौ होत्रमस्मिन्" इति व्युत्पत्त्या अग्निः आधारत्वेन विधीयते अथवा अग्नये होत्रमस्मिन् इति व्युत्पत्त्या अग्निरूपगुणस्य विधानमस्तु इति प्राप्ते–

नाद्यः भवितुमर्हति तथा सति "यदाहवनीये जुहोतीत्यनेन"(तै.ब्रा.१.१.१०.५) आधारत्वेन प्राप्तस्य आहवनीयस्य वैयर्थ्यापत्तेः। "अग्निर्ज्योतिर्ज्योरग्निः स्वाहा" (तै.ब्रा.२.१.९.२) इत्यनेन मन्त्रवर्णेन अग्निरूपदेवतायाः एवमेव "यदग्नये च प्रजापतये च सायं जुहोति"(मै.सं.१.८.७) इत्यनेन प्रजापतिरूपदेवतायाश्च प्राप्तत्वात् न द्वितीयोऽपि सम्भवति।

ननु–

तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः।
देवतायाः विधिस्तत्र दुर्बलन्तु परं परम्॥
(तं.वा.२.२.९)

इत्यादि वाक्यबलेन प्रजापतिदेवतया अग्निदेवतायाः बाधः भवति इति चेत्– "अग्निर्ज्योतिर्ज्योरग्निः स्वाहा"(तै.ब्रा.२.१.९.२) इत्यनेन प्राप्ताग्निरूपदेवतानुवादेन प्रजापतिरूपा देवता "यदग्नये च प्रजापतये च सायं जुहोति"(मै.सं.१.८.७) इत्यनेन विधीयते। तेन च अग्निप्रजापत्योः समुच्चयः सिध्यति। अत एव न प्रजापतिना अग्नेः बाधः। तस्य गुणस्य प्रख्यापकस्य वाक्यस्य विद्यमानत्वात् न अग्निहोत्रपदे गुणाङ्गीकारः। यदि तस्मिन् गुणपरता अङ्गीक्रियते तदा गुणप्रापकाणां वाक्यानां व्यर्थता

स्यात् । अत एव अग्निहोत्रपदं तत्प्रख्यशास्त्रात् नामधेयपर-मित्यङ्गीक्रियते ।

तद्व्यपदेशशास्त्रात् नामधेयनिरूपणम्

"श्येनेन अभिचरन् यजेत"(षड्.ब्रा.४.२.१.२) इत्यत्रापि श्येनरूपगुणः नैव विधीयते । अपितु श्येनपदं नामधेयपरम् । ननु श्येनः लोके तावद्गुणे प्रसिद्धः, न नाम्नि । इति चेत् सत्यम् । परन्तु वाक्यपर्यालोचनदशायां गुणत्वाङ्गीकारे कस्यचिद्बाधकस्योपस्थानात् नामधेयत्वमेव श्येनस्य अभ्युपगम्यते । "यथा वै श्येनो निपत्य आदत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्य आदत्ते यमभिचरन्ति" (षड्.ब्रा.४.२.३) श्येनवत् श्येनयागोऽपि शीघ्रं शत्रुं मारयति इति श्येनोपमानेन बुध्यते । अनेन श्येनपदं यागं स्तौति इति च सिध्यति । न च श्येनोपमानेन श्येन एव स्तोतुं शक्यते । उपमानोपमेयभावस्य भिन्ननिष्ठत्वात् । अत एव श्येनपदं तद्व्यपदेशात् नामधेयमिति सिध्यति । व्यपदेशो नाम उपमानमित्यर्थः । एतेषां नामधेयानां विधेयार्थपरिच्छेदकतया अर्थवत्त्वं प्रामाण्यञ्च अङ्गीक्रियते ।

वाक्यशेषनिरूपणम्

"सन्दिग्धेषु वाक्यशेषात्"(जै.सू.१.४.२९) इति जैमीनीयं सूत्रम् । विध्यर्थसन्देहाधीनाकांक्षाप्रयुक्तवाक्यविशेषः

वाक्यशेषपदेन व्यवह्रियते । ये च वाक्यशेषाः ते सर्वे अर्थवादा एव, परन्तु अर्थवादाः सर्वे न वाक्यशेषाः । सर्वेषां अर्थवादानां सन्देहोत्पाटनसामर्थ्याभावात् । अत एव वाक्यशेषाणां पुनश्चिन्त्यन्ते । "अक्ताः शर्करा उपदधाति" (तै.ब्रा.३.१२.५.१२) इत्यत्र शर्कराञ्जनाय यत् किञ्चित् द्रवद्रव्यं अपेक्षितम्। तदा जलतैलप्रभृतीनां प्राप्तौ तेषु केन कर्तव्यम् इति सन्दिग्धदशायां "तेजो वै घृतम्" (तै.ब्रा.३.१२.५.१२) इति वाक्यशेषेण सन्देहोत्पाद्यते । "अक्ताः शर्करा उपदधाति" इति शर्करोपाधानवाक्यसमीपे "तेजो वै घृतं" इति श्रूयमाणायाः घृतस्तुत्याः प्रयोजनान्तराभावात् अञ्जनाय अपेक्षितद्रवद्रव्य- विषयक-सन्देहोत्पाटनमेव प्रयोजनं इत्यङ्गीक्रियते युक्तमेव वाक्यशेषाणामपि प्रामाण्यम्।

सामर्थ्यनिरूपणम्

न च सर्वत्र सन्देहोत्पाटनं वाक्यशेषेणैव भवति । अत एव धर्माधर्मयोः अष्टमं सामर्थ्यं नामकं प्रमाणमपि अङ्गीक्रियते । "स्रुवेणावद्यति"(मै.सं.३.१०.४),"स्वधितिना अवद्यति" (मै.सं.३.१०.४) इति अवदानाङ्गतया स्रुवादीनि विहितानि । यागे तावत् आज्यादिद्रवद्रव्याणां मांसादिकठिणद्रव्याणाञ्च अवदानं प्रसिद्धम् । तत्र अविशेषेण स्रुवादीनि करणानि भवन्ति उत अस्ति वा किञ्चित् विनिगमकम् इति सन्देहः उत्पद्यत

एव । स्रुवादिना मांसादीनां कठिणद्रव्याणां अवदानं नैव शक्यते इत्यर्थापत्त्या आज्यादीनामवदाने यस्मिन् सामर्थ्यं तदनुरोधेन आज्यादिद्रवद्रव्ये साधनत्वं निर्णीयते । अत एव सामर्थ्यमपि धर्माधर्मयोः सन्देहोत्पाटनविनिगमकत्वेन प्रामाण्यं भजते । तदेवं निरूपितं शास्त्रदीपिकायाम्-

द्रवादिषु स्रुवादीनां व्याकोषस्य च सक्तुषु ।
अर्थापत्तिवशात्तस्मात् व्यवस्थेत्यवस्थितम् ॥

इत्थञ्च अष्टौ प्रमाणानि धर्माधर्मविबोधकानि प्रतिपादितानि । तथा च वार्तिकम्-

नामार्थवादविधिमन्त्रयुतश्च वेदः
तद्वत्स्मृतेश्च चरितञ्च निरस्तदोषम् ।
धर्मप्रमाणमिह सिद्धमतः परन्तत्
भेदप्रकारविनियोगफलादिचिन्ता ॥ इति ॥

॥ इति प्रथमः प्रमाणाध्यायः ॥

॥ अथ भेदाध्यायः ॥

भावनानिरूपणम्

सिद्धे प्रमाणे भेदोऽत्र निरूप्यते । शास्त्रेऽस्मिन् भावनामुख्यविशेष्यत्वम् आद्रियते । सिद्धे भावनाभेदे तद्बोधककर्मापि भिद्यते इति हेतोः तद्भेदबोधकानि षट् प्रमाणानि अत्र निरूप्यन्ते । का नाम भावना ? किं तस्याः लक्षणम् ? किं तस्याः स्वरूपमित्यादि प्रश्नाः सामान्या एव । "यजेत स्वर्गकाम" (तां.ब्रा.१६.१५.५) इत्यादौ यजेत इत्यत्र अस्ति अंशद्वयम् । यजि धातुः प्रत्ययश्च । प्रत्ययेऽपि अस्ति अंशद्वयम् । आख्यातत्वं लिङ्त्वञ्च । तत्र आख्यातत्वलिङ्त्वाभ्यां भावना उच्यते । भावना नाम "भवितुर्भवनानुकूलः भावकव्यापारविशेषः" । उत्पद्यमानस्य स्वर्गादिफलस्य उत्पत्त्यनुकूलः यागनिष्ठः उत्पादयितुः फलापेक्षकपुरुषस्य व्यापारविशेष इति निष्कर्षः । सा च शाब्दीभावना, आर्थीभावना इति द्विधा । शाब्दीभावना नाम प्रवर्तना इत्यर्थः । सा च प्रवर्तना लिङ्ज्ञानेन उत्पद्यते । अत एव प्रवर्तना एव लिङर्थः इति भाट्टाः । इष्टसाधनत्वं लिङर्थः इति मिश्राः । इष्टसाधनत्वं बलवदनिष्ठाननुबन्धित्वं कृतिसाध्यत्वञ्च लिङर्थः इति नैयायिकाः । एतच्छक्तित्रयकल्पने गौरवापत्तेः प्रवर्तना एव लिङर्थ इति सिद्धान्तः । सा च प्रवर्तना स्वनिर्वाहार्थम् अंशत्रयमपेक्षते ।

किं भावयेत् ? केन भावयेत् ? कथं भावयेदिति । तत्र किं भावयेदिति साध्याकांक्षायां कृतिं भावयेदिति , केन भावयेदिति साधनाकांक्षायां लिङादिज्ञानेन भावयेदिति , कथं भावयेदिति इतिकर्तव्यताकांक्षायाम् अर्थवादज्ञाप्यप्राशस्त्यज्ञानम् इतिकर्तव्यतात्वेन च अन्वेति । एवमेव आख्यातप्रत्ययेन आर्थीभावना उच्यते । आख्यातप्रत्ययस्य कृतिरेव अर्थः । वैयाकरणास्तावत् आख्यातप्रत्ययस्य कर्तरि शक्तिम् अभ्युपगच्छन्ति । परन्तु आकृत्यधिकरणन्यायेन कृतावेव शक्तिः कर्तरि लक्षणा अङ्गीक्रियते । कृतिः कर्तारं विना नावतिष्ठत इति तमाक्षिपति इति कृत्वा न कर्ता आख्यातवाच्यः । सा च कृतिः स्वनिर्वाहार्थं शाब्दीभावनावदंशत्रयम् अपेक्षते । तत्र साध्याकांक्षायां स्वर्गादिफलं साध्यत्वेनान्वेति । साधनाकांक्षायां धात्वर्थः साधनत्वेनान्वेति । कथम्भावाकांक्षायां प्रयाजाद्यङ्गजातम् इतिकर्तव्यतात्वेन अन्वेति । इत्थञ्च लिङादिवाच्यशाब्दीभावना प्रवर्तनारूपप्राशस्त्यज्ञानाद्यनुगृहीता इष्टसाधनत्वाद्याक्षेपमुखेन मुख्यविशेष्यभूतायाम् आख्यातार्थकृतौ एवान्वेति । सा च कृतिः पुरुषं कर्मणि नियोजयति कर्मजन्यफलावाप्तिं निबोधयति च। इत्थञ्च सिद्धं कर्मनिर्वहणे भावना एव मुख्या भवतीति । तत्रैव वाक्यबोध्यानां पदार्थानाम् अन्वयः अभ्युपगन्तव्यः ।"यजेत स्वर्गकामः" इत्यादौ यजेत इत्यत्र विद्यमानया भावनया यागे प्रवृत्तिः जायते।

प्रवृत्तस्य किं फलम् इत्याकांक्षायां स्वर्गफलं भाव्यत्वेन अन्वेति । तदा यागः स्वर्गसाधनमिति विज्ञायते ।

अपूर्वनिरूपणम्

यागादिजन्यः स्वर्गादिजनकः कश्चनव्यापारविशेषः अपूर्वपदेन व्यवह्रियते । " ज्योतिष्टोमेन स्वर्गकामो यजेत " इत्यनेन ज्योतिष्टोमेन स्वर्गं भावयेदिति वाक्यार्थः बुध्यते । अत्र स्वर्गयागयोः साध्यसाधरूपसम्बन्धः प्रदर्शितः । किन्तु क्रियारूपाणां यागादिकर्मणां क्षणिकत्वात् फलप्राप्तिपर्यन्तं तेषां स्थायित्वं नैव सम्भवति । कार्यनियतपूर्ववृत्तिः कारणमिति कारणलक्षणमुक्तम् । तदनुरोधेन कार्यपूर्वक्षणे कारणं भवेदेव । तथा च यागसमाप्त्यनन्तरमेव स्वर्गस्य प्राप्तौ उक्तः साध्यसाधनभावः युक्तो भवति । परन्तु यागसमनन्तरमेव फलप्राप्तिः नैव भवति । अपि तु कालान्तरे देशान्तरे देहान्तरे वा भविष्यति । अत एव यागफलयोः कार्यकारणभावनिर्वाहार्थम् अपूर्वनामकः कश्चनव्यापारविशेषः कल्प्यते । यागादिजन्यः स्वर्गादिजनकः कश्चिद्व्यापारविशेषः अपूर्वपदेन व्यवह्रियते । न च ध्वस्तस्य यागस्य फलसाधनत्वं सम्भवति । ध्वंसस्य जनकशक्त्यभावात् नित्यत्वाच्च । "तृप्त एवैनमिन्द्रः प्रजया पशुभिश्च तर्पयति" इत्याद्यर्थवादबलेन देवतातृप्तेरेव फलसाधनत्वमस्तु इति केचित् । नवमाध्याये देवताविग्रहादिपञ्चकस्य निराक्रियमाणत्वात् देवतातृप्तेः फलसाधनत्वं

नाङ्गीक्रियते । अत एव अपूर्वेणैव फलं भावनीयम् । तच्चापूर्वं द्विविधम् अङ्गापूर्वं महापूर्वञ्चेति । अनेकप्रधानकयागे प्रधानानां फलसाधनतानिर्वाहार्थं प्रथमं सर्वप्रधानसाध्यं परमापूर्वमेकं कल्प्यते । पश्चात् अङ्गसाहित्यसिध्यर्थं अङ्गपूर्वाणि कल्प्यन्ते । यथा लघोरेकस्य यन्त्रस्य सम्बन्धेन विना बृहद्यन्त्रं कार्यक्षमं नैवभवति । तथा लघुनाप्येकेन अङ्गेन विना यागः स्वर्गसाधनक्षमो नैव भवति । अत एव सर्वेषाम् अङ्गानां स्वस्वापूर्वद्वारा प्रधानेन साहित्यं अवश्यं कल्पनीयम् । इत्थञ्च यागेन परमापूर्वम् उत्पद्यते यागाङ्गैः उत्पन्नानि अङ्गापूर्वाणि परमापूर्वोपकारकाणि भवन्ति । इदञ्च अपूर्वं फलपर्यन्तम् आत्मस्थायी भवति फलं जनयित्वा प्रध्वंसते ।

कर्मभेदबोधकप्रमाणानि

भावनाभेदे ज्ञाते तद्बोधककर्मभेदः सिध्यति , सिद्धे कर्मभेदे कर्मजन्य अपूर्वभेदोऽपि सिध्यति इति कृत्वा भावना-भेदबोधकानि षट् प्रमाणानि विविच्यन्तेऽत्र । शब्दान्तरात् , अभ्यासात् , सङ्ख्यया , संज्ञया , गुणात् , प्रकरणान्तरादिति षट् कर्मभेदबोधकप्रमाणानि ।

शब्दान्तरात् कर्मभेदनिरूपणम्

"सोमेन यजेत"(तै.सं.३.२.२) , "हिरण्यमात्रेयाय ददाति " (शत.ब्रा.४.३.४२.१) , "दाक्षिणानि जुहोति" (तै.सं.६.१.१) इत्यादिषु यागदानहोमाः विहिताः । यजेत ददाति जुहोति इत्यत्र

विद्यमानेन "लेटस्थानीयतिप्" प्रत्ययेन भावना उच्यते । न च एकप्रत्ययगम्यत्वात् भावनाभेदाऽभावः । प्रत्ययस्यैकत्वेऽपि धात्वर्थानां भेदात् भावनापि भिद्यते । विभिन्नधात्वर्थकत्वमेव शब्दान्तरत्वपदेन व्यवह्रियते । यजेत इत्यनेन यागभावना, ददाति इत्यनेन दानभावना , जुहोति इत्यनेन होमभावना च विधीयते । अत एवात्र शब्दान्तरात्कर्मभेदोऽङ्गीक्रियते । वार्तिके च :–

" प्रत्ययांशः समानोऽपि प्रतिधातुप्रयोगतः।
तत्तदर्थानुसारेण भावनाभेदमावहेत् ॥"इति॥

अभ्यासात् कर्मभेदनिरूपणम्

दर्शपूर्णमासयोः – "समिधो यजति" "तनूनपातं यजति" "इडो याजति" "बर्हिर्यजति" "स्वाहाकारं यजति" (तै.सं.२.६.१) इति श्रूयते । न चात्र विभिन्नधात्वर्थक-त्वाभावात् कर्मभेदाभावः इति वाच्यम् । अत्र समिदादिपदानि तत्प्रख्यशास्त्रात् नामधेयपराणि । विभिन्नधात्वर्थकत्वाभावेऽपि विभिन्ननामधेयैः धात्वर्थस्य व्यवच्छेदसम्भवात् कर्मभेदः बोध्य एव । अत एव अनन्यपरपुनर्धिश्रवणरूपात् अभ्यासात् कर्म भेदः अभ्युपगम्यते ।

संख्यया कर्मभेदनिरूपणम्

चातुर्मास्यप्रकरणे श्रूयते "आमनमस्य आमनस्य देवा इति तिस्र आहुतीर्जुहोतीति" (तै.सं.२.६.९) । तत्र "आमनमस्य आमनस्य देवा ये सजाताः समनसः, आमनमस्य आमनस्य देवा ये कुमाराः समनसः, आमनमस्य आमनस्य देवा या स्त्रियः समनसः" (तै.सं.२.६.९) इति मन्त्रत्रयमभिहितम् । न चात्र सामानाधिकरण्याभावात् सङ्ख्यायाः भावनान्वयाभावात् न कर्मभेदः इति वाच्यम् । अपि तु अत्र त्रित्वसङ्ख्यायाः भावनया सह सामानाधिकरण्यासम्भवात् धात्वर्थवृत्तित्वम् अभ्युपगम्य एकत्वसङ्ख्याभावात् त्रिभिर्मन्त्रैः प्रत्येकमाहुतिरिति विज्ञेयम् । तस्मादत्र सङ्ख्याकृतः कर्मभेदः अभ्युपगम्यत एव।

संज्ञया कर्मभेदनिरूपणम्

चतुर्थः संज्ञया कर्मभेदः । "अथैष ज्योतिः"(तां.ब्रा.१६.८.१) "अथैष विश्वज्योतिः" (तां.ब्रा.१६.१०.१) "अथैष सर्वज्योतिः" (तां.ब्रा.१६.९.१) " एतेन सहस्रदक्षिणया यजेत " (तां.ब्रा.१६.८.३) इत्यत्र संज्ञया कर्मभेदो विज्ञेयः । न चात्र ज्योतिष्टोमानुवादेन दक्षिणाविधानं बोध्यम् । तत्र च द्वादशशतदक्षिणायाः विधानात् दक्षिणाकाङ्क्षायाः शान्तत्वात् । तथा च गुणविधानाङ्गीकारे ज्योत्यादीनां पदानां वैयर्थ्यप्रसङ्गः । अत एवात्र अथशब्देन परस्पर भेदबोधकत्वावगमात् ज्योतिविश्वज्योतिसर्वज्योत्याख्याः त्रयः यागाः विधीयन्ते इति

बोध्यम् । "एतेन सहस्र दक्षिणया यजेत" इत्यत्र एतच्छब्देन प्राप्तयागानुवादेन दक्षिणा विधीयते ।

गुणात् कर्मभेदनिरूपणम्

"तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा , वाजिभ्यो वाजिनमिति "(बौधा.श्रौ.५.९) चातुर्मास्यप्रकरणे श्रूयते । वाजिभ्यो वाजिनमित्यत्र आमिक्षायागानुवादेन गुणविधानं वा उत कर्मान्तरं वा इति सन्देहः । न च वाजमन्नम् आमिक्षारूपं एषां विद्यते इति व्युत्पत्त्या विश्वेदेवम् अनूद्य वाजिनमत्र विधीयते इति वाच्यम् । वाजि शब्दस्य विश्वेदेवानुवादकसामर्थ्याभावात् । अपि तु

तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः ।
देवतायाः विधिस्तत्र दुर्बलन्तु परम्परम् ॥

इत्यादियुक्तिबलेन वाजिभ्यः इत्यत्र श्रूयमाणचतुर्थ्या देवता एव परिगृह्यते । अत एव वाजिदेवताकं वाजिनगुणकं कर्मान्तरम् उपरितनवाक्येन विधीयते इति बोध्यम् । तथा च –

आमिक्षां देवतायुक्तां वदत्यैवैष तद्धितः ।
आमिक्षापदसान्निध्यात् तस्यैव विषयार्पणम् ॥

आमिक्षा इति तद्धितेन द्रव्यदेवतावैशिष्ट्यावगमात् द्रव्यान्तरनैरपेक्षाच्च आमिक्षायागे वाजिनस्य अप्रवृत्तेः वाजिनयागः अन्य एव भवति । अत एव गुणात् अत्र कर्मभेदो बोध्यः ।

प्रकरणान्तरात् कर्मभेदनिरूपणम्

कौण्डपायिनामयने श्रूयते "उपसद्भिश्चरित्वा मासमग्निहोत्रं जुह्वति"(ता.ब्रा.२५.४.१) इति । अत्र प्रकरणान्तरात् कर्मभेदः अङ्गीक्रियते । न चात्र नित्याग्निहोत्रानुवादेन आहवनीयवत् मासरूपगुणविधानमस्तु इति वाच्यम् । मासपदं काले प्रसिद्धम् । कालस्तावत् अनुपादेयो गुणः। अनुपादेयो नाम कृतिसाध्यत्वाभाववान् । कृतिसाध्यत्वाभाववतः विधानमपि अशक्यम् । प्राप्तस्य अग्निहोत्रयागस्य विधानमपि न शक्यते । अत एव कौण्डपायिनप्रकरणान्तर्गतं कर्मान्तरमेव इति उपरितनेन वाक्येन विज्ञेयम् ।

अनुपादेयपञ्चकनिरूपणम्

न केवलः कालोऽनुपादेयः । अपि तु—

देशः कालो निमित्तं च फलं संस्कार्यमेव च ।

इति मीमांसकाः प्राहुः अनुपादेयपञ्चकम् ॥

न च देशः कृतिसाध्यः । अन्यत्र विद्यमानो देशः अन्यत्र कर्तुमशक्यः। "सरस्वत्या दक्षिणेन तीरेण आग्नेयोऽष्टाकपालः" इत्यनेन सरस्वतीतीरे अष्टाकपालयागः कर्तव्यः इति बुध्यते । न च यागोऽयं अन्यत्र कर्तुं शक्यः । सरस्वतीतीरादन्यत्र सरस्वतीतीरस्य अनुपलब्धेः । द्वितीयस्तावत् कालः । "सायं जुहोति" (तै.सं.२.५.३)" प्रातर्जुहोतीत्यादौ "(तै.सं.२.५.३) कालसम्बन्धः विधीयते न तु कालः । न च सायङ्कालः

तद्व्यतिरिक्तकाले कर्तुं शक्यः। अत एव अयमनुपादेयः । एवं "ग्रस्ते स्नायात्" इत्यत्र निमित्तकृतानुपादेयता बोध्या । अनेन वाक्येन ग्रहणनिमित्तकं नैमित्तकं स्नानं ग्रहणकाले एव अनुष्ठेयम् । न च ग्रहणं कृत्वा स्नानं कर्तुं शक्यम् । अत एव निमित्तमपि अनुपादेयत्वेनैव गृह्यते ।

"यजेतः स्वर्गकामः" इत्यत्र यागेन स्वर्गं भावयेदिति वाक्यार्थः। अत्र यागः स्वर्गसाधनम् । स्वर्गस्तु यागसाध्यं फलम् । तच्च फलं यागेन उत्पद्यते नाम अवाप्यते न क्रियते । न च वृक्षारोपिणा एव फलमपि क्रियते । अपि तु आरोपिते वृक्षे फलमुत्पद्यते । तदनुकूलसलिलपवनादीनां व्यवस्था तेन क्रियते । अत एव फलमपि अनुपादेयो गुणः ।

"व्रीहीन् प्रोक्षतीत्यत्र "(शत.१.३.१.१०) प्रोक्षणं व्रीह्युद्देशेन विधीयते । तेन प्रोक्षणेन कश्चन संस्कारः व्रीहिषु उत्पद्यते । न प्रोक्षणेन संस्कार्याणां व्रीहीणामुत्पत्तिः। एवञ्च अनुपादेयगुणानां विधानं नैव शक्यते इति कृत्वा तेषां सम्बन्धविधानमङ्गीक्रियते ।

इत्थञ्च भिन्नैः कर्मभिः तदनुगुणं भिन्नं अपूर्वमुत्पद्यते तेन च लभ्यमानं फलमपि भिद्यते इति सिद्धो भेदाध्यायः ।

॥ इति द्वितीयः भेदाध्यायः ॥

॥ अथ शेषाध्यायः ॥

शेषत्वनिरूपणम्

निरूपिते भेदे तदनुष्ठानोपयोगितया विनियोगः विचिन्त्यते । अङ्गाङ्गिनोः सम्बन्धबोधकः विधिः विनियोगपदवाच्यः । सर्वाङ्गविशिष्टं कर्म अङ्गिपदेन व्यवह्रियते । अङ्गे निरूपिते अङ्गी अनुनिष्पद्यते इति कृत्वा अङ्गमेवात्र निरूप्यते । मुख्यफलाजनकत्वे सति मुख्यफलजनकव्यापारजनकत्वम् अङ्गपदवाच्यम् । जैमिनिनापि "शेषः परार्थत्वात" (जै.सू.३.१.२) इत्यनेन सूत्रेण अङ्गं लक्षितम् । यदुद्देशप्रवृत्तकृतिकारकत्वेन विहितं यत्तत्वं तदङ्गत्वमिति भाट्टदीपिकोक्तलक्षणम् (भा.दी.३.१.२)। अङ्गानां साक्षात् फलं नास्ति । अपि तु फलप्रयोजकप्रधानकर्मणां उपकारकत्वम् अस्ति । यथा दर्शपूर्णमासाङ्गत्वेन विहितानि प्रयाजाद्यङ्गानि । प्रयाजानां साक्षात फलं नास्ति । परन्तु दर्शपूर्णमासयागाः तैर्विना फलसाधने अक्षमाः भवन्ति । तस्मात तेषां प्रधानोपकारकत्वं फलं भाव्यम् । विना प्रमाणं प्रमा नोपलभ्यते इतिकृत्वा अङ्गत्वबोधकानि षट् प्रमाणानि उपपाद्यन्ते । तानि च श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याख्यानि ।

श्रुतिनिरूपणम्

तत्र प्रथमं प्रमाणं श्रुतिः । प्रमाणान्तरनिरपेक्षो रवः श्रुतिः । यथा "दध्ना जुहोति" (मै.सं.४.७.७) इति । अत्र

प्राप्ताग्निहोत्रानुवादेन तदङ्गत्वेन दधि विधीयते । होमाङ्गत्वं तावत , दध्ना इत्यत्र विद्यमानया तृतीयया विज्ञायते । सा च प्रमाणान्तरनिरपेक्षा स्वयमेव होमाङ्गत्वम् उपपादयति । एवमेव यदाहवनीये जुहोति , व्रीहीन् प्रोक्षति इत्यादावपि विज्ञेयम् ।

लिङ्गनिरूपणम्

द्वितीयमङ्गताग्राहकं प्रमाणं लिङ्गम् । " सामर्थ्यं सर्वभावानां लिङ्गमित्यभिधीयते " । "स्रुवेण जुहोति" (तै.सं.६.१.२) इत्यत्र अर्थसामर्थ्यात "स्रुवेण द्रवद्रव्यं जुहोति " इति अर्थलिङ्गेन स्रुवस्य द्रवद्रव्यहोमसाधनत्वम अभ्युपगम्यते । एवं "बर्हिर्देवसदनं दामि "(मै.सं.१.१.४) इत्यस्मिन् मन्त्रे विद्यमानबर्हिशब्देन कुशोत्पाटकोऽयं मन्त्र इति विज्ञायते । तथा च कुशच्छेदनस्यैव अङ्गं भवति अयं मन्त्रः। न च जघन्यवृत्याश्रयणेन उलपराजिलवनाङ्गम् । यत्र एकेन शब्देन अनेकार्थोपस्थितिः तत्र मुख्यार्थे एव विनियोगः ज्ञेयः ।

वाक्यनिरूपणम्

यत् पदानि संहत्य अर्थमभिदधति तद्वाक्यम । "समभिव्याहारो वाक्यमिति तस्य लक्षणम्" । सहोच्चारणमात्रेण अङ्गाङ्गिभावोऽवगम्यते तत्र वाक्यीयो विनियोगः विज्ञेयः । "यस्य पर्णमयीजुहूर्भवति न स पापं श्लोकं श्रृणोति" (तै.सं.३.५.७) इत्यत्र पर्णस्य जुह्वङ्गत्वम् अभ्युपगम्यते

समभिव्याहारादेव । पर्णतया जुह्वा हविरवदाने अपूर्वप्राप्तिं प्रतिजानिते इदं वाक्यम् ।

प्रकरणनिरूपणम्

एवं चतुर्थं प्रमाणं प्रकरणम् । उभयाकांक्षा प्रकरणम् । यथा "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यत्र विहितस्य दर्शपूर्णमासनामकस्य प्रधानकर्मणः अङ्गाकांक्षा भवति । एवं "पञ्चप्रयाजाः इज्यन्ते" (मै.सं.४.७.७)इत्यनेन विहितस्य प्रयाजनामकस्य अङ्गस्य प्रधानाकांक्षा भवति । तदा प्रधानस्य अङ्गाकांक्षा अङ्गस्य प्रधानाकांक्षा इति उभयाकांक्षा दृश्यते । सैव उभयाकांक्षा प्रकरणमिति कथ्यते । प्रकरणमिदं महाप्रकरणम् , अवान्तरप्रकरणञ्चेति द्विविधम् । मुख्यभाव-नासम्बन्धिप्रकरणं महाप्रकरणम् । यथा प्रयाजादीनां दर्शपूर्ण-माससम्बन्धः । अङ्गभावनासम्बन्धिप्रकरणम् अवान्तरप्रकरणम्। यथा अभिक्रमणप्रयाजयोः सम्बन्धः।

स्थाननिरूपणम्

स्थानं नाम उपस्थितिः। उपस्थितिश्च सन्निधिविशेषः। अनेन प्रमाणेन यस्य समीपे यत् कर्माम्नातं तस्य तदङ्गत्वमवधार्यते । यथा सान्नाय्यपात्रसन्निधौ आम्नातः शुन्धनमन्त्रः । अत एव स मन्त्रः सान्नाय्यपात्रप्रोक्षणाङ्गं भवति सन्निधानात् ।

समाख्यानिरूपणम्

समाख्या नाम यौगिकश्शब्दः। सा च वैदिकी लौकिकी इति द्वेधा विभक्ता । वैदिकी यथा हारियोजनः इति । हारियोजनो नाम ग्रहपात्रविशेषः। सा च संज्ञा मन्त्रेण प्राप्ता । स यथा "हरिरसि हारियोजनः"(तै.सं.१.४.२८) इत्यनेन गृह्यमाणो ग्रहः हारियोजन इति वैदिकी समाख्या । लौकिकी च याज्ञिकैः परिकल्पिता । सा यथा आध्वर्यवमिति । अध्वर्युकर्तृकाणि यानि कर्माणि सन्ति तानि आध्वर्यवपदेन व्यवह्रियन्ते । इति लौकिकी समाख्या ।

प्राबल्यदौर्बल्यविचारः

निरूपितेषु षट्सु प्रमाणेषु एतेषाम् एकत्र समवाये प्राबल्यदौर्बल्यविचारः सूत्ररूपेण जैमिनिना एवमुपबृम्हितम् । "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यम् अर्थविप्रकर्षादिति "(जै.सू.३.३.१४)। विप्रकर्षत्वन्नाम दूरत्वम् । तच्च विप्रकर्षत्वं द्विविधम् । कालकृतं दिक्कृतञ्चेति । अत्र कालकृतं विप्रकर्षत्वं विज्ञेयम् । तच्च कालकृतम् अर्थविप्रकर्षत्वम् । श्रुत्यादीनां एकत्र समावेशे विचार्यमाणे कालकृतविप्रकर्षत्वं भवति इति कृत्वा पारदौर्बल्यमङ्गीक्रियते । लिङ्गादीनां प्रमाणान्तरसापेक्षत्वात् अर्थविप्रकर्षत्वं भवति । अत एव पूर्व पूर्वाणां प्रमाणानां प्राबल्यम् , उत्तरोत्तराणां प्रमाणानां दौर्बल्यञ्च अङ्गीक्रियते । स यथा " ऐन्द्या गार्हपत्यमुपतिष्ठते"

(मै.सं.३.२.४) इत्यत्र इन्द्रसम्बन्धिः ऋक ऐन्द्री तया इति लिङ्गात इन्द्रोपस्थानार्थत्वं भवति । गार्हपत्यमिति द्वितीयया श्रुत्या झटिति गार्हपत्याङ्गत्वम उपस्थीयते । अत एव श्रुतेः प्राबल्यम अङ्गीक्रियते । सर्वत्र विनियोगस्तु श्रुत्या एव विज्ञेयः। प्रतिपादितानि च षट्प्रमाणानि विनियोगसहकारिभूतानि । शेषत्वं निरूपिते शेषी अनुनिष्पद्यते इति पूर्वमुक्तम । यथा प्रयाजादीनां शेषत्वाङ्गीकारेण तैः समुचितः सर्वाङ्गविशिष्टः शेषी दर्शपूर्णमासयागः निष्पद्यते इति शेषित्वं प्रत्यासन्नम्।

॥ इति तृतीयः शेषाध्यायः ॥

॥ अथ प्रयुक्त्यध्यायः ॥

क्रत्वर्थपुरुषार्थयोः विचारः

"अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा" (जै.सं.४.१.१) इत्यारभ्य जैमिनिना प्रयुक्त्यध्यायः प्रत्यपादि । निरूपिते शेषे कस्य प्रयोजकः शेषः इति विचिकित्सा जायते । सर्वश्च विधिः स्वविषयस्य प्रयोजक एव । अप्रयोजकस्य विधित्वानुपपत्तेः । स च विधिः क्रतुप्रयोजको वा उत पुरुषप्रयोजको वा इति अत्र विचार्यते । यत् यदर्थमनुष्ठीयते तत्तस्य प्रयोजकमित्युच्यते ।

कोऽयं क्रत्वर्थः? कोऽयं पुरुषार्थः? इति उदेति विचिकित्सा । ये अङ्गविधयः ते सर्वे क्रत्वर्थाः । एवं ये च प्रधानविधयः ते सर्वे पुरुषार्थाः । क्रतुप्रयोजनाय प्रयुक्ताः क्रत्वर्थाः पुरुषप्रयोजनाय प्रयुक्ताः पुरुषार्थाः इति क्रत्वर्थपुरुषार्थयोः सामान्यनिर्वचनम् । "स्वयंप्रार्थितवृत्त्युद्देश्यतानिरूपित – विधेयताकत्वं पुरुषार्थत्वम्"। "स्वयंप्रार्थितभिन्नवृत्त्युद्देश्य – तानिरूपितविधेयताकत्वं क्रत्वर्थत्वम्" (भा.दी.४.१.१) इति भाट्टदीपिकायां तयोः स्पष्टं लक्षणमुक्तम् । यथा "अग्निहोत्रं जुहुयात् स्वर्गकामः" "पञ्चप्रयाजा इज्यन्ते" इति क्रमेण तयोः उदाहरणम् । तत्र आद्ये वाक्ये अग्निहोत्रहोमः स्वर्गाय विहितः । स च स्वर्गः पुरुषार्थः । अत एव पुरुषार्थबोधकः प्रथमः । द्वितीये वाक्ये प्रयाजाः विहिताः । ते च प्रधानं

यागमुपकुर्वन्ति । तैर्विना यागः फलसाधनक्षमः नैव भवति अतः ते च यागोपकारकाः भवन्ति । प्रयाजैः यागं भावयेदिति वाक्यार्थोऽपि विज्ञेयः। अत एव ते क्रत्वर्थाः भवन्ति । न तत्र क्रत्वर्थपुरुषार्थादिषु पुरुषेण अर्थ्यते इति पुरुषार्थः क्रतुना अर्थ्यते इति क्रत्वर्थः इति व्युत्पत्तिः अङ्गीक्रियते । अपि तु क्रत्वर्थं ये अनुष्ठीयन्ते ते क्रत्वर्थाः पुरुषार्थं ये अनुष्ठीयन्ते ते पुरुषार्थाः इति तादर्थ्यचतुर्थी अङ्गीक्रियते । भाष्ये च "क्रतवे यः स क्रत्वर्थः" "पुरुषाय यः स पुरुषार्थः"(शा.भा.४.१.१) इति स्पष्टं प्रदर्शितम् ।

गोदोहनस्य पुरुषार्थत्वनिरूपणम्

ननु "गोदोहनेन पशुकामस्य प्रणयेत"(आ.श्रौ.१.१६.२) इत्यत्र चमसकार्ये नियुक्तं गोदोहनपात्रं क्रतुमुपकरोति पशुफलञ्च साधयतीति वैरूप्यं किल इति चेत् अभिधीयते । न च चमसस्य कार्ये गोदोहनस्य विधानम् । तथा सति गोदोहनविधेः प्रयोजनाभावात् विकल्पप्रसक्तिः स्यात् । अपि तु पशुफलाय एव तस्य विधानम् । अत एव पुरुषार्थत्वं तस्य अभ्युपगम्यते ।

पयोव्रतादीनां क्रत्वर्थत्वनिरूपणम्

एवञ्च ज्योतिष्टोमे समामनन्ति "पयोव्रतं ब्राह्मणस्य यवागू राजन्यस्य आमिक्षा वैश्यस्य"(तै.आ.२.८) इति । अत्र सन्देहः किमयं पुरुषधर्मः उत क्रतोरिति । अत्र ज्योतिष्टोमप्रकरणे

विहितेऽपि न क्रत्वर्थः । अपि तु प्रकरणं बाधित्वा वाक्येन पुरुषहिताय पयोव्रतादयः विधीयन्ते इति पुरुषार्थाः एते इति चेत् , न । अयं धर्मः शरीरधारणार्थः बलकरणार्थश्च । पुरुषार्थत्वे सति पय आदिभिन्नैरपि तत्सम्भवात् नियमस्य वैयर्थ्यप्रसङ्गः । अत एव क्रत्वर्थोऽयं नियमः इति स्पष्टम् ।

पर्युदासनिरूपणम्

अत्रैव प्रसङ्गात् प्रतिषेधनिषेधौ च विचार्येते । प्राजापत्ये स्नातकव्रतमाम्नातम् । तस्य व्रतमित्युपक्रम्य श्रूयते–

नेक्षेतोद्यन्तमादित्यं नास्तंयन्तं कदाचन ।
नोपरिष्टं न वारिस्थं न मध्यनभसो गतम् ॥

इत्यत्र प्रतिषेधो वा पर्युदासो वेति चिन्त्यते । न च सर्वेषां वाक्यप्रतिपादितानां पदार्थानां भावनायाम् अन्वयाङ्गीकारात् नेक्षेतेत्यादिषु विद्यमानस्य नञः तत्रैवान्वयाङ्गीकारात् प्रतिषेध एव आश्रयणीयः इति वाच्यम् । तथा सति उपक्रमोपसंहारयोः वैरूप्यप्रसङ्गः । अत एव पर्युदासः समाश्रियते । तस्य च लक्षणं इत्थमुक्तम् ।

पर्युदासः स विज्ञेयः यत्रोत्तरपदेन नञ् ॥ इति ॥

यदा तु प्रत्ययार्थभावनाव्यतिरिक्तेन धात्वर्थेन वा उपपदार्थेन वा तस्य नञः अन्वयः तदा पर्युदासः इति विज्ञेयः। ईक्षेतेत्यत्र ईक्षणरूपधात्वर्थे एव नञः अन्वयात् पर्युदासः इति विज्ञेयः। अन्यथा उपक्रमोपसंहारयोः वैरुध्यप्रसङ्गः । ईक्षणाभाव –

रूपानीक्षणरूपसङ्कल्पं भावयेदितिवाक्यार्थो बोध्यः । स च अनीक्षणसंकल्पः पुरुषार्थः ।

निषेधनिरूपणम्

एवं "न कलञ्जं भक्षयितव्यमित्यत्र"(मनु.स्मृ.५.५) प्रतिषेधः विज्ञेयः। तस्य च लक्षणमेवंमुक्तम्

"प्रतिषेधः स विज्ञेयः क्रियया सह यत्र नञ् ॥" इति

यदा प्रत्ययार्थभावनया सह नञः सम्बन्धः तदा प्रतिषेधः इति बोध्यः । न च निपातस्य नञः भावनान्वयाभावः । तथा सति कलञ्जान्वितेन नञा कलञ्जातिरिक्तस्य भक्षणविधानप्रसङ्गः । तस्य च भक्षणस्य रागतः प्राप्तत्वात् विधानं नैव शक्यते । नेक्षेतेत्यत्र यथा तथा धात्वर्थान्वयोऽपि न साधीयान् । तत्र च उपक्रमानुरोधेन पर्युदासाश्रयणम् । अत एवात्र भावनायामेव नञः अन्वयः युक्तः । तेन कलञ्जभक्षणं प्रतिषिध्यते । तच्च पुरुषार्थायैव भवति । ननु भक्षयेदित्यत्र विद्यमानस्य लिङः प्रवर्तनार्थः । कथं तेनैव लिङा निवर्तना बोध्यते इति चेत् यथा लिङ् प्रवर्तनां बोधयति तथा नञ्घटितलिङ् निवर्तनां बोधयति । तथा च उक्तं वार्तिककारेण–

प्रवृत्तौ वा निवृत्तौ वा या शब्दश्रवणेन धीः ।
सा चोदनेति सामान्यं लक्षणं हृदये स्थितम् ॥ इति
(श्लो.वा.१.१.२.२१०)

चोदनायाः प्रवर्तनावत् निवर्तनाऽपि अर्थत्वेन गृहीता । न च साक्षात् चोदना निवर्तनां बोधयति । अपि तु नञ् घटिता एव ।

नञः षडर्थत्वनिरूपणम्

तस्य च नञः षडर्थाः प्रसिद्धाः । स यथा–

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट्प्रकीर्तिताः ॥
(न्या.को.न.वि)

"अनिक्षुः शरः" इत्यत्र सादृश्यं नञर्थः । इक्षुदण्डवत् शरः इति ।"भूतले घटो नास्ति" इत्यत्र अभावः नञर्थः ।"अघटः पटः"इत्यत्र तदन्यत्वं नञर्थः ।"अनुदरमुदरं तरुण्या" इत्यत्र नञः अल्पत्वम् अर्थः। उदराभावत्वं तरुण्याः अशक्यत्वात् । "अब्राह्मणो वार्धुशिकः" इत्यादौ अप्राशस्त्यं प्रतिपादयति नञ् । एवं " सुरोऽसुरः" इत्यत्र विरुद्धार्थं वक्ति नञ् । प्रतिषेधपर्युदासयोः विरोध एव नञर्थः । उपपदेन अन्वितः नञ् पर्युदासं ब्रूते । भावनायामन्वितः नञ् प्रतिषेधं प्रतिपादयति इति दिक् । उभयोः पुरुषार्थ एव फलमिति विज्ञेयम् ।

॥ इति चतुर्थः प्रयुक्त्यध्यायः ॥

॥ अथ क्रमाध्यायः ॥

क्रमनिरूपणम्

निरूपिते शेषशेषिभावे कथं अनुष्ठेयम् ? कस्य च अङ्गस्य प्रथममनुष्ठानम् ? कस्य च अनन्तरम् ? इत्यादयः प्रश्नाः भवन्ति । अत एव तेषाम् अङ्गानाम् अनुष्ठाने अपेक्षितः नियतक्रमः अस्मिन् अध्याये निरूप्यते । अव्यवहितोत्तरत्वरूपम् आनन्तर्यं क्रमपदवाच्यः । स च प्रयोगप्राशुभावबोधकं प्रयोगविधिं निष्पादयति । स च क्रमः षट् प्रमाणगम्यः । तानि च प्रमाणानि श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्याख्यानि ।

श्रुतिनिरूपणम्

तत्र प्रथमं क्रमबोधकं प्रमाणं श्रुतिः । श्रुतिर्नाम वृत्त्या क्रमबोधकः क्लृप्तः शब्दः । श्रुतिस्तु क्वचित् "क्त्वा" प्रत्ययेन क्वचित् "अथ" शब्देन क्वचित् " तत " इति अव्ययेन च विज्ञायते । "वेदं कृत्वा वेदिं कुर्यात् " (आप.श्रौ.७.३.१०) इत्यत्र क्त्वाप्रत्ययेन वेदकरणकर्माव्यवहितोत्तरक्षणे वेदिं कुर्यादिति क्रमो बुध्यते । तत्र विद्यमानस्य क्त्वाप्रत्ययस्य पूर्वोत्तरकर्मण आकांक्षा विद्यते । वेदेन पूर्वकर्मणः वेदिना उत्तरकर्मण आकांक्षा शाम्यते । एवं "हृदयस्य अग्रे अवद्यति अथ जिह्वायाः" (मै.सं.३.१०.३) इत्यत्र विद्यमानेनापि अथशब्देन क्रमः गम्यते । "अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति तत उद्गातारं ततो

होतारं" (शत.१२.१.१.१-११) इत्यस्मिन् वाक्ये विद्यमानेन तत इति अव्ययेन च क्रमोऽवगम्यते । एतेषु स्थलेषु क्रमबोधनाय नान्यत् प्रमाणमपेक्षते साक्षात् श्रुत्यैव क्रमः बुध्यते । अत एव क्रमबोधकेषु प्रबलं प्रमाणमिदम् ।

अर्थक्रमनिरूपणम्

द्वितीयः अर्थक्रमः । यत्र प्रयोजनवशेन क्रमनिर्णयः तत्र तस्य अर्थक्रम इति व्यवहारः । वेदे तावत् "अग्निहोत्रं जुहोति " (तै.ब्रा२.१.२.८) "ओदनं पचति" (तै.ब्रा.२.१.३.७) इति श्रूयते । न च अग्निहोत्रानन्तरं क्रियमाणस्य ओदनस्य प्रयोजनमस्ति । होमे द्रव्यत्वेनैव ओदनस्य अपेक्षितत्वात् । ननु होमानन्तरं क्रियमाणस्य ओदनस्य अदृष्टं बोध्यते इति चेन्न । दृष्टे सम्भवति अदृष्टस्य अन्याय्यात् । अत एव प्रयोजनवशेनैव "ओदनं पचति"(तै.ब्रा.२.१.३.७) "अग्निहोत्रं जुहोतीति" (तै.ब्रा२.१.२.८) व्युत्क्रमेण क्रमः बोध्यः। प्रयोजनन्तु ओदनस्य होमे द्रव्यत्वेन विनियोग एव ।

पाठक्रमनिरूपणम्

तृतीयः पाठक्रमः । पदार्थबोधकानां वाक्यानां येन क्रमेण पाठः तेनैव क्रमेण अनुष्ठानबोधकः क्रमः पाठक्रमः । "समिधो यजति , तनूनपातं यजति , इडो यजति , बर्हिर्यजति , स्वाहाकारं यजति" (तै.सं.२.३.१) इति समिधादि प्रयाजविधायकानि वाक्यानि । एतेषां वाक्यानां वेदे यथा

आम्नानं तथैव क्रमोऽपि विज्ञेयः । न च "अग्निहोत्रं जुहोति" "ओदनं पचति" इत्यत्र अस्य सम्भवः । प्रयोजनाभावात् अदृष्टकल्पनागौरवाच्च । अत एव पाठक्रमात् अर्थक्रम एव प्रबलः ।

स्थानक्रमनिरूपणम्

चतुर्थः स्थानक्रमः । स्थानं नाम उपस्थितिः । समीपस्थस्य शीघ्रस्मृतिविशेषः उपस्थितिपदवाच्यः । ज्योतिष्टोमे प्रकृतौ अग्नीषोमीयसवनीयानुबन्ध्यनामकाः त्रयः पशुयागाः आम्नाताः। ते त्रयः पशुयागाः विकृतौ साद्यस्क्रे चोदकप्राप्ताः। तत्र त्रयाणां यागानाम् अनुष्ठानं कथमिति । जिज्ञासायाम् उपस्थित्या क्रमः निर्णीयते । साद्यस्क्रे त्रयः पशुयागाः सवनीयदेशे समुच्चित्य प्राप्ताः । अतः सवनीयस्यैव प्रथमतः उपस्थितिर्जायते । अतः सवनीयः प्रथममनुष्ठीयते इतरौ तु पश्चात् ।

मुख्यक्रमनिरूपणम्

पञ्चमः मुख्यक्रमः । येन क्रमेण प्रधानयागाः पठिताः तेनैव क्रमेण तेषामङ्गानामनुष्ठानं मुख्यक्रमेणैव भवति । "प्रयाजशेषेण हवींषि अभिघारयति"(तै.सं.२.६.१) इति श्रूयते । तत्र कस्य हविषः प्रथमम् अभिघारणम् इति सन्देहे प्रधानक्रमेण प्रथमम् आग्नेयस्य पश्चात् दध्नः ततः पयसः इति प्रधानानुष्ठानक्रमेणैव अभिघारणं भवति ।

प्रवृत्तिक्रमनिरूपणम्

षष्ठः प्रवृत्तिक्रमः । सह प्रयुज्यमानेषु प्रधानेषु सन्निपतितानामङ्गानाम् आवृत्त्या अनुष्ठाने कर्तव्ये द्वितीयादिपदार्थानां प्रथमानुष्ठित पदार्थक्रमाद्यः क्रमः स प्रवृत्तिक्रमः। "सप्तदशप्राजापत्यानालभेत" इत्यत्र पशूनां नियोजनालम्भनादयः प्रवृत्तिक्रमेण अनुष्ठीयन्ते । न च एकस्य पशोः नियोजनादिकं सम्पूर्णं समाप्य अन्यस्य क्रियते । तथा सति परस्परव्यवधानं स्यात् । वार्तिकेऽपि–

प्रवृत्त्या वा नियम्येत प्रत्यासत्तेरनुग्रहात् ।
अन्यथा व्यवधानं स्यादनुज्ञाताधिकैरपि ॥

एकस्यैव पशोः पदार्थाः मिथः प्रत्यासन्नाः प्रवृत्तिक्रमेण भवन्ति । अत एव स आश्रियते ।

प्रतिपादितेषु षट्सु प्रमाणेषु परस्परमेकत्र समवहितेषु पूर्वपूर्वस्य प्राबल्यं विज्ञेयं लाघवात् । इत्थञ्च सिद्धाः प्रयोगबोधकाः क्रमप्रविभागाः ।

॥ इति पञ्चमः क्रमाध्यायः ॥

॥ अथ अधिकाराध्यायः ॥

अधिकारलक्षणनिरूपणम्

धर्मे प्रमाणं किम् ? धर्मभेदकाः हेतवः के ? अङ्गाङ्गिभावः कथं निरूप्यते ? प्रयुक्तिः कथं वा अवगन्तव्या ? ज्ञातेषु येषु अंशेषु , प्रयोगः कथं वेदितव्यः? इत्येतेषां प्रश्नानामुत्तराणि पञ्चसु अध्यायेषु निरूपितानि । तदिदानीम् उपदेशोपसंहारकः अधिकारश्चिन्त्यते । " कर्मजन्यफलस्वाम्यबोधको विधिः " अधिकारविधिः । यथा " अग्निहोत्रं जुहुयात् स्वर्गकामः " इति । अत्र यः स्वर्गं कामयते सः स्वर्गकामः। स एव स्वर्गजनके स्वर्गसाधनके वा अग्निहोत्रे अधिकारी भवति । फलभोक्तृत्वसमानाधिकरणकर्तृकत्वम् अधिकारत्वम् इति (भा.दी.६.१.१) अधिकारलक्षणम् । केवलं फलभोक्तृत्वम् अधिकारत्वमित्युक्ते श्राद्धादौ मृतपितरि अतिव्याप्तिः । श्राद्धे तृप्तिरूपं फलं पिता एति । अत एव तस्याधिकारत्वनिवारणाय कर्तृत्वमिति पदनिवेशः । पितरि फलभोक्तृत्वसत्वेऽपि कर्तृत्वाभावात् नातिव्याप्तिः । कर्तृत्वमात्रोक्तौ ऋत्विक्षु अतिव्याप्तिः । अत एव फलभोक्तृत्वसमानाधिकरण – कर्तृकत्वमिति पदनिवेशः । फलभोक्तृत्वाभावात् ऋत्विक्षु नातिव्याप्तिः । तथाऽपि फलभोक्तृत्वसमानाधिकरणकर्तृकत्वं श्राद्धे जातेष्टौ च न सम्भवति । श्राद्धे फलभोक्ता पिता कर्ता पुत्रः । जातेष्टौ फलभोक्ता पुत्रः कर्ता पिता । उभयत्राऽपि

फलभोक्त्रत्वकृत्वयोः समानाधिकरणकत्वाभावात् लक्षणान्तरमेवाङ्गीक्रियते । प्रवृत्तिप्रयोजकफलेच्छासमानाधिकरणकर्तृत्वं अधिकारत्वम् इति निर्दुष्टम् अधिकारलक्षणम् ।

स्वर्गस्य भाव्यत्वनिरूपणम्

धात्वर्थस्यैव भाव्यत्वं पदश्रुत्या प्रतीयते । स्वर्गादेः वाक्येन भाव्यत्वसिद्धिः भवति । पदश्रुतेः वाक्यं दुर्बलम् । अत एव धात्वर्थस्यैव भाव्यत्वान्वयः बोध्यः । "चन्दनं स्वर्गः" "द्व्यष्टवर्षा स्त्रीस्वर्गः" (शा.भा.६.१.२) इत्यादिना सुखसाधनत्वं स्वर्गस्य बोध्यम् । न तु सुखत्वमिति चेन्न । आगमविरुद्धत्वात् शिष्टैः सुखत्वेन उपगतत्वाच्च । यथा–

यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतञ्च तत्पदं स्वःपदास्पदम् ॥

तथा च –

स्वर्गादिः कामनायोगात् फलेनैवावगम्यते ।
स्वारस्यात्पुरुषाणां हि कामना फलगोचरः ॥

इति वार्तिकमपि स्वर्गकामः इति कामपदयोगात् भाव्यत्वेन अन्वय एव स्वर्गपदस्य वक्तव्यमिति बोधयति ।

अधिकारिनिरूपणम्

प्रतिपादिते अधिकारे स केषामिति विचिन्त्यते । स्वर्गो नाम सुखविशेषः इति पूर्वत्र प्रतिपादितम् । सुखप्राप्तिर्मे भूयादिति सर्वेऽपि जीविनः अभिलषन्ति । अत एव

स्वर्गकामत्वाविशेषात् चेतनामात्रस्याधिकारः । इति चेत् न । भावनाया अंशत्रयान्वयोत्तरं विधिबलेनाधिकारिकत्वस्य कल्प्यमानत्वात् साङ्गप्रधानानुष्ठानसमर्थानाम् एव अधिकारः । न तु असमर्थानाम् अविद्यानाम् अद्रव्याणाम अधिकारः ।

दम्पत्योः सहाधिकारनिरूपणम्

न च "स्वर्गकामो यजेत" इत्यत्र पुल्लिङ्गस्य विवक्षा । तथा सति स्त्रीणाम् अनधिकारप्रसङ्गः । न च इष्टापत्तिः। "धर्मे च अर्थे च कामे च नातिचरितव्या " (मनु.मे.६.१.१४), "पाणिग्रहणाद्धि सहत्वं कर्मसु तथा पुण्यफलेषु च" (भा.दि.६.१.३) इत्यादीनां वाक्यानां विरोधप्रसङ्गः । अत एव यज्ञे कर्मणि दम्पत्योः व्यासज्यवृत्त्या सहाधिकारः अङ्गीक्रियते । व्यासज्यवृत्तिर्नाम एकत्वावच्छिन्नपर्याप्तिमत्वम् । न च काम्ये कर्मणि पङ्ग्वादीनामधिकारः । विष्णुक्रमणादिषु अशक्तत्वात् । न चात्र यथाशक्तिन्यायोऽपि घटते । नित्ये कर्मणि तु घटत एव । " वर्षासु रथकार आदधीत"(आप.श्रौ.८.४.१३) "एतया निषादस्थपतिं याजयेत् "(मै.सं.२.२.४) इत्यादौ रूढेः तत्तज्जातिविशेषाणां रथकारादीनामेव अधिकारो बोध्यः । न तु रथकारातिरिक्तनां ब्राह्मणानां वा अधिकारः । अध्ययनाभावेऽपि तेषां विहितकर्मानुष्ठानाय यावती अपेक्षिता विद्या तावत्यः आक्षेपसम्भवात् । इत्थञ्च सिद्धं विहितकर्मसु विहितानामेव

तत्तत्कर्मानुष्ठानयोग्यानामेवाधिकारः न तु सर्वेषां सर्वेषु कर्मसु इति । तद्यथा भणितं गीतायाम्–

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥

(भ.गी.१८.४७)

॥ इति षष्ठोऽधिकाराध्यायः ॥

॥ अथ अतिदेशाध्यायः ॥

अतिदेशलक्षणनिरूपणम्

पूर्वेषु षट्सु अध्यायेषु उपदेशः विचिन्तितः। उपदेशो नाम–

यदपेक्षितधर्माणां प्रत्यक्षं प्रतिपादकम् ।
प्रधानसन्निधौ शास्त्रम उपदेशः स उच्यते ॥

(प्रभा.व्या.११.१.१)

सिद्धे उपदेशे अधुना अतिदेशश्चिन्त्यते । " प्रकृतिवद्विकृतिः कर्तव्या " इति प्रसिद्धः नियमः । यत्र समग्राङ्गोपदेशः सा प्रकृतिः । यथा दर्शपूर्णमासादिः । यत्र चोदकादङ्गप्राप्तिः सा विकृतिः । यथा सौर्यादिः । यत्किञ्चिदङ्गैरेव सौर्येष्टिः अनुष्ठातुं न शक्या । अत एव तदपेक्षिताङ्गानां प्राप्तिः अतिदेशनियमेन भवति । तस्मादेव विकृत्युपयोगाय अतिदेश अस्मिन्नध्याये विचार्यते । कोऽयमतिदेशः इति जिज्ञासायाम् अनेकेषां निर्वचनमेवमुपलभ्यते । प्रकृतौ विहिताः धर्माः तामतीत्य अन्यत्र अङ्गानां देशः येन भवति स अतिदेशः । भाष्येऽपि " अतिदेशो नाम ये परत्र विहिताः धर्माः तमतीत्य अन्यत्र तेषां देशः" (शा.भा ७.१) । यथा " शालिसूपमांसापूपैर्देवदत्तो भोजयितव्य " इति देवदत्तस्य भोजनविधिं कृत्वा, तमेव विधिं यज्ञदत्ते अतिदिशति " देवदत्तवद्यज्ञदत्तो भोजयितव्य " इति । कुत्रचित् श्लोकमपि उदाहरन्ति –

प्रकृतात् कर्मणो यस्मात् तत्समानेषु कर्मसु ।
धर्मप्रदेशो येन स्यात् सोऽतिदेश इति स्थितिः ॥

(प्रभा.व्या.११.१.१)

अन्यत्रापि–

अन्यत्र विहितायास्तु कृत्स्नाया धर्मसंहतेः।
अन्यत्र कार्यतः प्राप्तिरतिदेशोऽभिधीयते॥

(प्रभा.व्या.११.१.१)

"यः पदार्थो यादृशोपकारद्वारा यदङ्गत्वेनावधारितः तस्य पदार्थस्य तत्सम्बन्धित्वेन रूपेण तादृशोपकारद्वारैव अन्याङ्गताबोधकं प्रमाणाम् इति । स चातिदेशः द्विवधः वचनातिदेशः नामातिदेशश्चेति । वचनातिदेशोऽपि प्रत्यक्षवचनातिदेशः अनुमितवचनातिदेशश्चेति द्वेधा विभक्तः । सादृश्यकल्पितवचनातिदेशः, स्थानापत्तिकल्पितवचनातिदेशः, आश्रयोपस्थितिकल्पितवचनातिदेश इति अनुमित-वचनातिदेशोऽपि त्रेधा विभक्तः । भाष्ये कर्मनामातिदेशः, संस्कारनामातिदेश्प् ,यौगिकनामातिदेशश्चेति नामातिदेशस्यापि त्रैविध्यमुक्तम् ।

प्रत्यक्षवचनातिदेशनिरूपणम्

प्रथमं तावत् प्रत्यक्षवचनातिदेशश्चिन्त्यते । प्रत्यक्षेण वचनेन यत्राऽतिदेशो विधीयते स प्रत्यक्षवचनातिदेशः । स यथा "समानमितरच्छ्येनेन" (षड्.ब्रा.४.३.७) इति । अनेन श्येनयागे विहिताः लोहितोष्णीषादिधर्मा इषुयागे

अतिदिश्यन्ते । न च इतरच्छब्दः सन्निहितवचनत्वेन लोके प्रसिद्ध अत ज्योतिष्टोमसन्निधौ श्रूयमाणे इषुयागे इतरच्छब्देन ज्योतिष्टोमधर्मा अनूद्यन्ते इति वाच्यम् । श्येनयागस्थाः केचन धर्माः इषौ अपेक्षिताः । ते धर्मा अनेन चोदकवाक्येनैव इषुयागं प्राप्नुवन्ति । "समानमितरच्छयेनेन" इत्यनेन प्रत्यक्षवचनेनैव इषुयागे श्येनधर्माणां प्राप्यमाणत्वादत्र प्रत्यक्षवचनातिदेशो बोध्यः ।

नामातिदेशनिरूपणम्

एवं "मासमग्निहोत्रं जुह्वति" (तां.ब्रा.२५.४.१) इत्यत्र नामातिदेशो बोध्यः । "अग्निहोत्रं जुहोति" इत्यनेन विहिताः नित्याग्निहोत्रधर्माः मासाग्निहोत्रे अतिदिश्यन्ते । न च उभयत्र विद्यमानस्य अग्निहोत्रशब्दस्य अविशेषात् नातिदेशः , अपि तु नित्याग्निहोत्रानुवादेन मासरूपगुणविधानमस्तु इति वाच्यम् । प्रकरणान्तरादत्र कर्मभेदाङ्गीकारात् अग्निहोत्रपदस्य तत्प्रख्यशास्त्रात् नामधेयाङ्गीकाराच्च नात्र गुणविधिः सम्भवति । अपि तु अग्निहोत्रपदं नित्याग्निहोत्रस्थान् धर्मान् मासाग्निहोत्रं प्रति स्वनाम्ना अतिदिशति ।

अनुमितवचनातिदेशनिरूपणम्

एवं "सौर्यं घृते चरुं निर्वपेत् ब्रह्मवर्चसकामः" इत्यत्र अनुमितवचनातिदेशः दृश्यते । इयं च सौर्येष्टिः दर्शपूर्णमासान्तर्गतस्य आग्नेयस्य विकृतिः । न च "सौर्यं घृते चरुं निर्वपेत् ब्रह्मवर्चसकामः"(तै.सं.२.३.२) इत्यत्र

दर्शपूर्णमाससम्बन्धकल्पकं किञ्चित् विनिगमकमस्ति । अत एव पार्वणाष्टकादिषु बहुषु प्रवृत्तं लौकिकं शास्त्रमनुमेयमिति न च वाच्यम् ।

वैदिकी वैदिकत्वेन सामान्येनापि तिष्ठति ।
लौकिकी त्वसमानत्वान्नोपस्थास्यत्यपेक्षिता ॥

"सौर्यं चरुं घृते निर्वपेत् ब्रह्मवर्चसकामः" इत्यनेन प्राप्तं कर्म वैदिकम् । वेदे श्रूयमाणत्वात् । तस्य च कथंभावाकांक्षायां वैदिक एवेत्थंभावः शीघ्रमुपतिष्ठते । तदतिक्रम्य लौकिकोपस्थितिकल्पना अयुक्ता । स्थालीपाकादीनां दर्शपूर्णमासादीनाञ्च अग्निसाध्यत्वं समानम्, परन्तु स्थालीपाकादयः औपासनाग्नौ क्रियन्ते । दर्शपूर्णमासादय आधानसिद्धे आहवनीये । स्थालीपाके एक एवाग्निः दर्शपूर्णमासादौ तु त्रयोऽग्नयः । अधर्मका सौर्येष्टिः त्रेताग्निसाध्यत्वेन दर्शपूर्णमासयागवद्विहिता । अत एव यथा दर्शपूर्णमासाभ्याम् अपूर्वं कृत्वा फलं सम्पादनीयं तथैव सौर्येष्ट्यापूर्वं कृत्वा फलं सम्पादनीयमिति वैदिकधर्मकाणामेव अतिदेशोऽनुमेयः । इत्थं सामान्यतोऽत्रातिदेशः निरूपितः ।

वचनादभिधानतस्तया विदितं कृत्स्नमिहातिदेशनम् ।
अनुमावचसापि सत्तया भविता तस्य विशेषचिन्तनम् ॥

सादृश्यकल्पितातिदेशोऽष्टमे विचिन्त्यते इति सामान्यातिदेशोऽत्र समाप्तिमेति ।

॥ इति सप्तमः सामन्यतिदेशाध्यायः ॥

॥ अथ विशेषातिदेशाध्यायः ॥

विशेषातिदेशविचारस्य प्रामुख्यम्

सप्तमे सभेदोऽतिदेशश्चिन्तितः । अस्मिन् सैवातिदेशः विशेषतया विचिन्त्यते । न च "निर्विशेषं न सामान्यमिति" न्यायेन सामान्ये विशेषस्यापि सत्वात् पुनः विशेषतः अतिदेशविचारः व्यर्थ इति वाच्यम् । वैदिकवाक्योत्पन्नानां विकृतिकर्मणां धर्माकांक्षायां वैदिकप्रकृतिकर्मभ्यः अतिदेशो युक्तेति सप्तमे निरूपितम् । परन्तु सौर्यादीनां धर्माकांक्षायां दर्शपूर्णमासान्तर्गतेषु कस्मात् यागात् धर्मातिदेशः युक्तः? तत्र किं विनिगमकम्? इति निर्णयः दुःशक एव । अत एव तन्निर्णयायैव विशेषातिदेशः आरभ्यते ।

"सौर्यं घृते चरुं निर्वपेत् ब्रह्मवर्चसकामः" इत्यत्र विद्यमानायाः भावनायाः आकांक्षात्रयं विद्यते । साध्याकांक्षायां वाक्यस्थं ब्रह्मवर्चसनामकं फलं साध्यत्वेनान्वेति । साधनाकांक्षायां चरुद्रव्यताका सूर्यदेवताका इष्टिः साधनत्वेनान्वेति । इतिकर्तव्यताकांक्षायाम् अत्र समग्राङ्गानामभावात् औषधद्रव्यकात् आग्नेययागात् धर्माणाम् अतिदेशः भवति द्रव्यघटितसादृश्यात् । अत्रातिदेशे मानं सादृश्यमेव ।

प्रधानानां फलानां च अनतिदेशनिरूपणम्

न च "गोदोहनेन पशुकामस्य प्रणयेत्"(आप.श्रौ.१.१६.२) इत्यत्र विहितपशुफलस्य विकृतौ अतिदेशः । अङ्गमेव

प्रधानभावनायाम् अन्वेतीति नियमेन गोदोहनपात्रात् प्रागेव चमसपात्रस्यैवान्वयात् गोदोहनस्य पशुफलसाधने अन्यद्रव्यानपेक्षत्वाच्च प्रधानभावनान्वयविरहाच्च विकृतौ अतिदेशः नैव सम्भवति । प्रकृतिवद्विकृतिः कर्तव्या इत्यत्र अङ्गनाम् अतिदेश एव ज्ञेयः न तु प्रधानस्यापि ।

सादृश्यातिदेशप्रविभागनिरूपणम्

सादृश्यं द्विविधं द्रव्यघटितसादृश्यं देवताघटितसादृश्यञ्चेति। यत्र प्राकृतद्रव्यघटितसादृश्यावलम्बनेनातिदेशः स द्रव्यघटित–सादृश्यकृतातिदेशः । यथा आग्नेयप्राकृतिकः सौर्ययागः । यत्र देवतासङ्ख्याबलेन वा देवतैक्येन वा अङ्गानामतिदेशः स देवाताघटितसादृश्यकृतातिदेशः। यथा "आग्नावैष्णवमेका–दशकपालं निर्वपेत्"(मै.सं.२.१.७) इत्यत्र द्विदेवत्यरूप–सादृश्यत्वेन अग्नीषोमीयधर्माणाम् अतिदेशः आग्नावैष्णवे बोध्यः न तु क्रमसामान्यात् अग्नेयस्य ।

सादृश्यातिदेशयोः प्राबल्यदौर्बल्यविचारः

"आग्नेयं पयः"(मै.सं.३.१.८) इत्यत्र द्रव्यघटितसादृश्यात् सान्नाय्यविकारत्वमङ्गीक्रियते । न तु देवताघटितसादृश्येन आग्नेयविकारत्वम् । न च "तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति" (तै.सं.२.५.४) इत्यर्थवादबलेन यागः देवतार्थः अत एव देवतासादृश्यं प्रबलम् इति वाच्यम् । यागो हि देवतोद्देशेन द्रव्यत्यागरूपः । अतः त्यागाय प्रथमं

द्रव्यमपेक्षते । द्रव्यस्यैव प्रथमोपस्थानात् द्रव्यदेवतासादृश्ययोः विरोधे द्रव्यघटितसादृश्यस्यैव प्राबल्यम् निर्णीयते । एवम् आमिक्षायागोऽपि द्रव्यघटितसादृश्यात् दर्शपूर्णमासस्थ – पयोयागविकारः । न च सा वैश्वदेव्यामिक्षा इत्यत्र तच्छब्देन द्वितीयान्तस्य दध्नः अनुवादात् दधियागविकारत्वम् आमिक्षायागस्य इति वाच्यम् । आमिक्षायाः मधुरभूयस्त्वात् , दध्यभावेऽपि अम्लादिना आमिक्षाया अन्वयव्यतिरेकाभ्यां सम्पत्तेः । "जुषतां युज्यं पयः"(तै.सं.२.४.१४) इत्यस्मात् मन्त्रवर्णाच्च पयस एव विकारत्वं आमिक्षायागस्य बोध्यम् । सक्तुन्यायेन "तप्ते पयसि " इत्यत्र सप्तम्याः प्राधान्यलक्षणा ज्ञेया ।

॥ इत्यष्टमः विशेषातिदेशाध्यायः ॥

॥ अथ ऊहाध्यायः ॥

ऊहलक्षणनिरूपणम्

सिद्धेऽतिदेशेऽधुनाऽस्मिन्नध्याये अतिदिष्टानां धर्माणां विकृत्युपयोगितया ऊहश्चिन्त्यते । ऊहो नाम प्रकृतौ अन्यथादृष्टस्य विकृतौ अन्याथाभावः । यथाऽहुः –

प्रकृतस्थानपतितपदार्थान्तरकार्यतः ।
ऊहप्रयोगो विकृते ऊह्यमानतयोदितः ॥

(मी.म.म९.१.१)

"येन सम्बन्धेन यद्धर्मावच्छिन्नवृत्तित्वं यस्य प्रकृतौ श्रुतं तस्य तेन सम्बधेन विकृतौ तद्धर्मावच्छिन्नभिन्नवृत्तित्वमिति ऊहसामान्यलक्षणम् "।

ऊहप्रभेदनिरूपणम्

स च ऊहः मन्त्रसंस्कारसामभेदेन त्रिविधः । दर्शपूर्णमासा–ङ्गभूताग्नेयहविर्निर्वापाङ्गत्वेन श्रूयते – "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि" (तै.स.१.१.३) इति । अयञ्च मन्त्रः तत्र अग्निदेवतास्मारकः । स च सौर्ये चोदकप्राप्तः । सौर्ये तु नाग्निः देवता अपि तु सूर्यः । सौर्ये अग्निप्रकाशकस्य मन्त्रस्य प्रयोजनाभावात् सूर्यप्रकाशकस्य मन्त्रस्य आकांक्षितत्वाच्च वेदे सूर्यप्रकाशकस्य मन्त्रस्याभावाच्च अग्निपदस्थाने सूर्यपदस्य ऊहः क्रियते । यथा दर्शपूर्णमासप्रकृतौ स्मारकत्वसम्बधेन

अग्नित्वावच्छिन्नवृत्तित्वं "अग्नये जुष्टं निर्वपामि" इत्यस्य मन्त्रस्य श्रुतं तद्वदेव सौर्यरूपविकृतौ च स्मारकत्वसम्बन्धेनैव अग्नित्वावच्छिन्नभिन्नसूर्यवृत्तित्वात् तस्यैव मन्त्रस्य "सूर्याय जुष्टं निर्वपामीति" ऊहेति मन्त्रोहे लक्षणं समन्वितम् । एवमेव प्रोक्षणावघातादीनां संस्कार्यतासम्बधेन व्रीहित्वाद्यवच्छिन्न-वृत्तित्वं प्रकृतौ श्रुतं, विकृतौ च तेनैव संस्कार्यसम्बधेन व्रीहित्वाद्यवच्छिन्नभिन्नश्यामाकादिवृत्तित्वात् प्रोक्षणावघाता-दीनाम् ऊह इति संस्कारोहे लक्षणसमन्वयः। एवं साम्नामपि आयीभावादिरूपाणां गानोपकारकसम्बधेन यत्स्थानगतैकार-वृत्तित्वं प्रकृतौ श्रुतं विकृतौ तेनैव गानोपकारकसम्बधेन ऐकारभिन्नस्थानगतैकारत्वादूहेति साम्नि लक्षणसमन्वयः ।

विग्रहादिपञ्चकखण्डनम्

अत्रैव प्रसङ्गात् देवतोद्देशेन द्रव्यत्यागरूपाणां यागानां किं देवाताप्रसादेन फलसम्पादकत्वमुतापूर्वद्वारा वा इति चिन्त्यते । देवतायाः यागे सम्प्रदानत्वेन प्राधान्यात् यागस्य च "यजदेवपूजासङ्गतिकरणदानेषु" (पा.धा.१००२) इति शाब्दिकस्मरणात् यागस्य देवपूजारूपतया पूजायाश्च विग्रहाद्यपेक्षितत्वाच्च ते च अर्थवादैः कल्प्यन्ते । स यथा "सहस्राक्षो गोत्रभिद् वज्रबाहुरस्मासु देवो द्रविणं दधातु"(तै.सं.२.३.१४) इत्यनेन विग्रहः , "अग्निरिदं हविरजुषतेत्यनेन"(तै.ब्रा.३.५.१०.२-३) हविस्वीकारः ,

"अद्धीन्द्र पिब च प्रस्थितस्य तुभ्यं सूतो मघवन् तुभ्यं पक्वः" (ऋ.सं.१०.११६.७) इत्यनेन हविर्भोजनम् , "तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयतीत्यनेन" (तै.सं.२.५.४) , तृप्तिः तया च तृप्त्यैव प्रसादश्च कल्प्यते । यागेन तोषिता देवता एव प्रसादद्वारा अभीष्टं फलं ददातीत्येतैर्बुध्यते । इत्थञ्च यागः देवताप्रसादार्थः देवताप्रसादेन स्वर्गादिप्राप्तिः न त्वपूर्वेण इति प्राप्ते-

अभिधीयते - देवताप्रसादस्य निर्वक्तुमशक्यत्वात् पूर्वोक्तार्थवादानां स्वार्थे तात्पर्याभावाच्च न देवताप्रसादद्वारा स्वर्गादिफलप्राप्ति अपि तु अपूर्वद्वारा एव । तथा सति "वनस्पतिभ्यः स्वाहा" इत्यादीनामपि विग्रहकल्पनाप्रसङ्गः स्यात् तत्तु प्रत्यक्षविरुद्धम् । एवं पापकर्मणां देवताभावात् प्रसादस्याप्यसम्भवात् पापजन्यदुःखस्यापि प्राप्त्यभावप्रसङ्गः । इन्द्रवाचकाभ्यां गोत्रभिद्वृत्रशब्दाभ्यां वाच्यस्य विग्रहस्यैकत्वात् "गोत्रभिदे स्वाहा" इत्यस्य स्थाने "वृत्राय स्वाहा" इति प्रयोगापत्तिः स्यात् तत्तु अयुक्तम् । तथा च यागस्थानां सर्वेषां देवतावाचकपदानां विग्रहकल्पनागौरवप्रसङ्गाच्च शब्दमात्रं देवतेत्यङ्गीक्रियते । अत एव इन्द्रादिशब्दरूपदेवतोद्देशेन कृतेन यागेन अपूर्वं, तेन च स्वर्गादिफलमिति शास्त्रीयः क्रमः । अपूर्वस्य प्रयोजनं तत्स्वरूपञ्च प्रथम एव वर्णितमिति न पुनरुच्यते । विग्रहाङ्गीकारे हि सौर्यादौ अग्नेरभावात्

अग्निदेवताप्रयुक्तधर्माः नैवातिदिष्टाः भवेयुः । तदा ऊहस्यापि नैव स्यात् विचारः । तदनङ्गीकारे अग्नेरभावेऽपि अपूर्वप्रयुक्तानां धर्माणामतिदेशः सम्भवति तत्प्रयुक्त ऊहोऽपि सम्भवति इति प्रयोजनवान् स्यादूहविचारः ।

॥ इति नवमः ऊहाध्यायः ॥

॥ अथ बाधाध्यायः ॥

सभेदबाधलक्षणनिरूपणम्

सिद्धे ऊहेऽधुना बाधश्चिन्त्यते । "प्रकृतिवद्विकृतिः कर्तव्या" इत्यनेन प्राकृताः सर्वे धर्माः विकृतिं प्राप्नुवन्ति । प्राप्तानां सर्वेषां धर्माणामनुष्ठानं न शास्त्रसम्मतम् । अत एव प्रयोजनरहितानां धर्माणां बाधोऽध्यायेऽस्मिन् विचार्यो विषयः । "अतिदिष्टधर्मस्य यन्निवर्तनं तद्बाधः" । प्रकृतिसम्बन्धिनः पदार्थस्य विकृत्यङ्गत्वग्राहकप्रमाणाभावो वा । अयञ्च बाधः त्रिविधः अर्थलोपात् , प्रत्याम्नानात् , प्रतिषेधाच्चेति ।

अर्थलोपाद्बाधनिरूपणम्

अर्थलोपात् बाधः यथा "प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्कामः"(मै.सं.२.२.२) इत्यत्र विहितस्य कृष्णलशब्दितेषु स्वर्णतण्डुलेषु व्रीहिधर्माः प्रोक्षणावघातादयः दर्शपूर्णमासात् चोदकप्राप्ताः । तुषविमोचनरूपदृष्टप्रयोजन-हीनतया व्रीहिधर्मा अतिदिष्टा अपि कृष्णलेषु बाध्यन्ते । न च कृष्णलस्य विक्लत्तेरशक्यत्वात् चोदकप्राप्तं श्रपणमर्थ-लोपाद्बाध्यते । दृष्टार्थस्य विक्लेदनादेरसम्भवेऽपि अदृष्टार्थं श्रपणं कर्तव्यम् । अन्यथा "घृते श्रपयति" (तै.सं.२.३.२) इतिवचनस्य वैयर्थ्यापत्तिः।

प्रत्याम्नानाद्बाधनिरूपणम्

श्येनयागे बर्ह्यर्थं कुशाः आस्तीर्यन्ते । "समानमितरच्छ्येनेन" (षड्.ब्रा.४.३.७)इत्यनेन वचनेन इषौ कुशाः बर्ह्यर्थं चोदकप्राप्ताः । "शरमयं बर्हिर्भवति" (तै.सं.२.१.५) इत्यनेन कुशस्थाने शराम्नानात् प्राकृतकुशस्य बाधः प्रत्याम्नानात् बोध्यः । दर्शपूर्णमासयोः श्रूयते "होतारं वृणीते"(मै.सं.३.९.८) इति । तच्च होतृवरणं चोदकतः पितृयज्ञे प्राप्तम् । तत्र"न हि होतारं वृणीते न आर्षेयम्"(तै.ब्रा.१.६.९.१,२) इत्यस्मात् प्रतिषेधात् चोदकप्राप्तं वरणं बाध्यते ।

प्रतिषेधाद्बाधनिरूपणम्

ज्योतिष्टोमे "ऋत्विग्भ्यो दक्षिणां ददाति इति श्रुतम्"(मै.सं.४.८.३) इत्यनेन दक्षिणादानं विहितम् । न चात्र विहितं दानम् अदृष्टार्थम् । अपि तु ऋत्विजां आनत्यर्थम् । आनतिर्नाम धनं दत्वा कार्यं कर्तुं स्वीकरणम् । ननु आनत्यर्थं दानं चेत् कार्याल्पत्वाधिक्याभ्यां दक्षिणाल्पत्वाधिक्ये नियमिते स्याताम् । किन्तु तथा नास्ति त्रैधातवीयादिषु अल्पायासकर्मसु सहस्रात्मिकायाः महद्दक्षिणायाः, ऋतपेयादिषु बह्वायासकर्मसु औदुम्बरसोमचमसात्मिकायाः लघुदक्षिणायाः विधीयमानत्वात् इदं दक्षिणादानमदृष्टार्थमिति चेन्न । "दीक्षितमदीक्षिता

दक्षिणापरिक्रीता ऋत्वजो याजयन्ति" (काठ.सं.२३.१) इति प्रत्यक्षश्रुत्या आनत्यर्थत्वमेव दक्षिणादानस्य उपस्थापितत्वात् नादृष्टार्थं दक्षिणादानमिति सिध्यति । इदञ्च दक्षिणादानं चोदकतः ज्योतिष्टोमात् सत्रमाप्नोति । सत्रे तु " ये यजमानास्ते ऋत्विजः"(आप.श्रौ.५.२६.३) इति वचनात् यजमानस्यैव आर्त्विज्यकर्मणि नियोजितत्वात् आनत्यर्थं चोदकप्राप्तदक्षिणादानस्य प्रयोजनाभावात् बाध एव तस्य बोध्यम् । इत्थञ्च अर्थलोपप्रत्याम्नानप्रतिषेधेभ्यः निष्पन्नोऽयं बाधः ।

॥ इति दशमः बाधाध्यायः ॥

॥ अथ तन्त्राध्यायः ॥

सोदाहरणतन्त्रावापलक्षणनिरूपणम्

सिद्धे बाधे संप्रत्युपदेशातिदेशसाधारण्येन प्रयोगानुष्ठा – नोपयोगितया तन्त्रावापौ चिन्त्येते । " यत् सकृत् कृतं बहूनामुपकरोति तत्तन्त्रम्" । यथा बहूनां ब्राह्मणानां मध्ये कृतः प्रदीपः । यस्तु आवृत्त्या उपकरोति स आवापः । यथा तेषामेव ब्राह्मणानां कृतमनुलेपनम् । तन्त्रं तावदङ्गानामेव भवति न तु प्रधानानाम् । अनेकेषां प्रधानानां समानकाले समानदेशे समानकर्तृ[redacted] एकोद्देशेनानुष्ठीयमाने प्रयोगैक्यात् तन्त्रमुपयुज्यते । देशकालोद्देशकर्तृभेदे प्रयोगभेदात् तत्रानुष्ठानमपि न शक्यते । स यथा दर्शपूर्णमासयोः आग्नेयदिषट् प्रधानयागाः सन्ति । तेषु आग्नेयोपांश्वग्नीषोमीयाः पूर्णमासकाले आग्नेयदधि –पयोयागाः दर्शकाले अनुष्ठीयन्ते । एतेषां षड्यागानां "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" (तै.सं.२.२.५) इत्यनेन स्वर्गफलं श्रुतम् । एते विभिन्नेषु उत्पत्तिवाक्येषु उत्पन्ना अपि न प्रत्येकं स्वर्गफलं साधयन्ति । अपि तु एकेन वाक्येन फलसम्बन्धविधानात् दण्डचक्रादिवत् समुच्चयेन स्वर्गफलं साधयन्ति । त्रिकाणां त्रिकाणां यागानां

दर्शपूर्णमासयोः विभिन्नकालयोः अनुष्ठानविधानात् प्रयोगद्वयमाश्रियते । एकस्मिन् काले त्रयाणां प्रधानाना– मनुष्ठानेऽपि तेषां त्रयाणामुद्देशेन क्रियमाणानि प्रयाजादीनि प्रतिप्रधानं न आवर्तनीयानि अपि तु तन्त्रमेव प्रयाजादीनामङ्गानां देशकालोद्देशकर्तृभेदाभावात् ।

आवापस्योदाहरणम्

"ज्योतिष्टोमेन स्वर्गकामो यजेत"(आप.श्रौ.१०.२.१) "चित्रया यजेत पशुकामः" (तै.सं.२.४.६) इत्यादिवाक्यविहितानि काम्यकर्माणि । अत्र भूयो भूयः फलकामनायां तानि च कर्माणि पुनरावर्तनीयान्येव । नाम काम्यकर्मणाम् आवाप एव । न चापूर्वरूपसामग्रीसत्वात् पुनः पुनः फलोत्पत्तिसम्भवात् न आवाप इति वाच्यम् । सकृत कृतेन कर्मणा उत्पन्नमपूर्वं सकृदेव फलं जनयित्वा नश्यति । अत एव पुनः पुनः फलकामनायां सत्यां पुनः कर्मणाम् आवापः कार्यः ।

प्रयोजनवशात्तन्त्रावपयोर्निरूपणम्

कदाचित् तन्त्रावापौ प्रयोजनवशात् निर्णीयेते । स यथा दर्शपूर्णमासयोः "व्रीहीनवहन्ति" इत्यवघातो विहितः । अवघातस्य सकृदनुष्ठानेऽपि अवघातविधिः कृतार्थः स्यात् । तथाऽपि न सकृदवहन्यन्ते । अवघातस्य प्रयोजनाकांक्षायां तण्डुलनिष्पत्तिरेव प्रयोजनमिति निश्चीयते । तच्च सकृदवघातेन न सिध्यतीति कृत्वा यावद्वैतुष्यं तावदावर्तनीयम् । यत्र तु

दृष्टप्रयोजनस्यासम्भवात् अदृष्टार्थमवहननं न तन्त्रावर्तनम् । यथा " औदुम्बरम् उलूखलं सर्वौषधस्य पूरयित्वा अवहन्ति अथ एतदुपदधाति "(आप.श्रौ.१६.२६.२) इत्यत्र वैतुष्यस्य सर्वौषधस्य अग्रे विनियोगाभावात् न यावद्वैतुष्यम् तावदवहननस्यावर्तनं किन्तु अदृष्टार्थं सकृदेव अवहननम् । इत्थञ्च सिद्धम् अनेकेषां प्रधानानामगृह्यमाणाविशेषे अङ्गानां तन्त्रता गृह्यमाणविशेषे तु आवापः।

॥ इत्येकादशः तन्त्राध्यायः ॥

॥ अथ प्रसङ्गाध्यायः ॥

सोदाहरणप्रसङ्गनिरूपणम्

निरूपिते तन्त्रेऽस्मिन् द्वादशाध्याये प्रसङ्गश्चिन्त्यते । "अन्यत्र कृतस्य अन्यत्रापि प्रसक्तिः प्रसङ्ग" इति भाष्ये । " प्रसङ्गो नाम अन्यत उपकारलाभप्रयुक्ताङ्गाननुष्ठानम्" इति भाट्टदीपिकायाम् । यथा "प्रासादे कृतेन दीपेन राजमार्गेऽपि प्रकाशकरणम्" इति भाष्योदाहरणम् । अत्र तावत् प्रसङ्गस्य स्पष्टप्रतिपत्तये प्रसङ्गः तदपवादश्च चिन्त्यते । "अग्नीषोमीयस्य वपया प्रचर्य अग्नीषोमीयं पशुपुरोडाशमेकादशकपालं निर्वपति (श.ब्रा.५.३.३.१) " इत्यनेन अग्नीषोमीयपशुपुरोडाशयागो विहितः । तत्र प्रयाजादीनि अङ्गानि दर्शयागात् अतिदिष्टानि । तत्र पाशुकतन्त्रमध्ये पुरोडशस्याऽपि विधानात् पशुयागोद्देशेन कृतैरेव प्रयाजाद्यङ्गैः प्रसङ्गादुपकारसिद्धेः न पुनः पुरोडाशयागोद्देशेन प्रयाजादीनामनुष्ठानम् । पितृभोजनोद्देशेन कृतेन दीपेन तत्पार्श्वस्थस्य भुञ्जानस्य पुत्रस्यापि प्रसङ्गादालोकदर्शनात् न पुनः पुत्रभोजनोद्देशेन दीपः प्रज्वाल्यते ।

दर्शपूर्णमासप्रकरणे "आज्यभागौ यजति " (तै.सं.६.६.३) इत्याज्यभागहोमः विहितः । स च पशुयागे चोदकतः प्राप्तः । तत्र " न तौ पशौ करोति , न सोमे "(श.त१.६.३.१९) इत्यनेन प्रतिषेधेन बाध्यते । न च पशौ आज्यभागप्रापकस्य चोदकस्य लुप्तत्वात् पुरोडाशेऽपि तस्य लोपः । प्रसङ्गेन चोदकस्य बाधासम्भवात् । पशोः प्रसङ्गेन यत् प्राप्तं तस्मादतिरिक्तं यद्वर्तते पौरोडाशिकम् आज्यभागादिकम् तत्सर्वं पुरोडाशोद्देशेन कर्तव्यमेव ।

॥ इति द्वादशः प्रसङ्गाध्यायः ॥

॥ अथ परिशिष्टः ॥

॥ प्रमाणानि ॥

भट्टमते – प्रत्यक्षम् , अनुमानम् , उपमानम् , शब्दः , अर्थापत्तिः , अनुपलब्धिः इति षट् प्रमाणानि ।

गुरुमते – प्रत्यक्षम् , अनुमानम् , उपमानम् , शब्दः ,अर्थापत्तिः इति पञ्च प्रमाणानि ।

॥ पदार्थाः ॥

भट्टमते– द्रव्यम् , जातिः , गुणः , क्रिया , अभावः इति पञ्च पदार्थाः ।

गुरुमते – द्रव्यम् , गुणः , कर्म , जाति , शक्ति , सादृश्यम् , संख्या , समवायः इति अष्टौ पदार्थाः।

॥ द्रव्याणि ॥

पृथिवी , जलम् , तेजः ,वायुः , तमः , आकाशम् , कालः , दिक् ,आत्मा , मनः , शब्दः इत्येकादश द्रव्याणि ।

॥ गुणाः ॥

रूपम् , रसः , गन्धः , स्पर्शः , संख्या , परिमाणम् , पृथक्त्वम् , संयोगः , विभागः , परत्वम् , अपरत्वम् ,

गुरुत्वम् , द्रवत्वम् , स्नेहः , बुद्धिः , सुखम् , दुःखम् , इच्छा , द्वेषः , प्रयत्नः , संस्कारः , ध्वनिः , प्राकट्यम् , शक्तिः इति चतुर्विंशतिर्गुणाः।

॥ मीमांसानुगुणं मोक्षप्रतिपादनम् ॥

चतुर्विधपुरुषार्थेषु चरमः पुरुषार्थः मोक्षः। मोक्षविषये अनेकाः विप्रतिपत्तयः सन्ति । तत्र मीमांसकाः मोक्षस्वरूपं सिद्धान्तयन्ति । मीमांसानुगुणम् आत्मा नित्यः विभुश्च । जगदपि नित्यम् । आत्मा स्वकर्मानुगुणं शरीरमुपेत्य सुखं दुःखञ्च अनुभवति। बन्धनं तावत् त्रिविधम्। भौतिकशरीरम्, इन्द्रियाणि , जगति विद्यमानपदार्थाश्चेति। तान्येव भोगायतनम् , भोगसाधनम् , भोगविषयाः इति पदैः व्यवह्रियन्ते । नित्यात्मा स्वकर्मवशात् भोगायतनरूपं शरीरमाश्रित्य भोगसाधनैः इन्द्रियैः प्रपञ्चस्थान् विषयान् अनुभवति । अनुभवाय पौनःपुन्येन स्वकर्मानुगुणं शरीरान्तरमेत्य जन्म प्राप्नोति । तर्हि मोक्षो नाम कः ? स च कथं प्राप्यते ? इति जिज्ञासायां भणितञ्चभट्टैः –

तस्मात्कर्मक्षयादेव हेत्वभावे न मुच्यते॥ इति

(श्लो.वा.१.१.५.सं.आ.१०६)

कर्मक्षयादेव मोक्षः प्राप्यते इति अनेन वचनेन ज्ञायते । " शरीरसम्बन्धो बन्धः, तदभावो मोक्षः " इति न्यायरत्नाकरे।

आत्मशरीरयोः सम्बन्धाभावो वा प्रपञ्चसम्बन्धविलयो वा मोक्षपदवाच्यः इति उपरितनवाक्येन बुध्यते ।

ननु मीमांसकैः स्वर्गादिप्रतिपादकाः यागाः प्रतिपाद्यन्ते । तेषाम् अनुष्ठाने कर्मसंग्रहात् पुनः शरीरात्मसम्बन्धरूपः बन्धो जायते किल इति चेदुच्यते।

मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः ।
नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासया॥

(श्लो.वा.१.१.५.११०)

नित्यनैमित्तिके च पूर्वकृताधर्मक्षयाय कर्तव्ये , काम्यकर्मणाम् अकामनया अनुष्ठाने कर्मसंग्रहः नोपजायते । तदेवं वार्तिककारेण भणितम्–

प्रार्थ्यमानं फलं ज्ञातं न चानिच्छोर्भविष्यति॥ इति

(श्लो.वा.१.१.५.१११)

इत्थं च सिद्धं शरीरात्मसम्बन्धविलयो मोक्षः स च विहितकर्मानुष्ठानेन सिध्यतीति।

मीमांसाप्रवर्तकः

मीमांसाप्रवर्तकः जैमिनिरित्यत्र नास्ति संशयलेशोऽपि । परन्तु जैमिनेः प्रागपि मीमांसकाः आसन्निति जैमिनिसूत्रेणैव विज्ञायते । तद्यथा "द्रव्यगुणसंस्कारेषु बादरिः " (जै.सू.३.१.३) इति । जैमिनेः कालविषये सन्ति अनेकाः विप्रतिपत्तयः । जैमिनिव्यासौ समकालिकौ इत्यत्र किञ्चित् प्रमाणमुपलभ्यते । तद्यथा –

पराशरात् सत्यवत्याम् अंशांशकलया विभुः ।
अवतीर्णो महाभाग वेदाञ्चक्रे चतुर्विधम् ॥ (भा.पु.१२.६.४९)
पैलाय संहिताम् आद्यां बह्वचाख्यां उवाच ह ।
वैशम्पायनसंज्ञाय निगदाख्यं यजुर्गणम् ॥(भा.पु.१२.६.५२)
साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम् ।
अथर्वाङ्गिरसीं नाम स्वशिष्याय सुमन्तवे ॥ (भा.पु.१२.६.५३)
जैमिनेः समगस्यासीत्सुमन्तुस्तनयो मुनिः ।
सुत्वांस्तु तत्सुतस्ताभ्यामेकैकां प्राह संहिताम् ॥
(भा.पु.१२.७५)

एवमेव शब्दकल्पद्रुमेऽपि पुराणवचनम्–
जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च ।
पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारकाः ॥ (श.क.जै.वि)

जैमिनिः "अथातो धर्मजिज्ञासा" इत्यारभ्य "अन्वाहार्ये च दर्शनात " इत्यन्तसूत्रैः द्वादशान अध्ययान् निरूपितवान् । तत्र षष्टिपादेषु चतुश्चत्वारिंशदुत्तरसप्तविंशतिशतसूत्राणि निबद्धवान् (१२.६०.२७४४) । तत्रापि सूत्राणां सङ्ख्याविषये सन्ति विप्रतिपत्तयः। सूर्यनारायणसूरिभिः विरचितायां भाटरहस्यभूमिकायां चतुः पञ्चाशदुत्तरसप्तविंशति – शतसूत्राणि उल्लिखितानि (२७४५) । महर्षिविश्वविद्यालयेन प्रकटिते ("ई–ग्रन्थालये") सूत्रपुस्तके तावत् चत्वारिंशदुत्तरसप्तविंशतिशतसूत्राणि प्रकटितानि (२७४०) । सङ्कर्षकाण्डोऽपि जैमिनिना एव निबद्धः इति शबरस्वामिनाम् "इति सङ्कर्षे वक्ष्यति " (शा.भा.१२.२.११) इत्यनया उक्त्या बुध्यते । संकर्षणकाण्डे तावत् "अनुयजतीत्य–नुवषट्कारश्चोद्यते " इत्यस्मात्सूत्रादारभ्य " विद्यते वा अन्यकालत्वाद्यथा याज्यासम्प्रैषो यथा याज्यासम्प्रैषः " इत्यन्तिमसूत्रपर्यन्तं नवोत्तरसप्तशतसूत्राणि उपलभ्यन्ते (७०९)।

वृत्तिकारः

मीमासासूत्राणां वृत्तिः उपवर्षेण विरचिता इत्यत्र किञ्चित् प्रमाणमुपलभ्यते । प्रत्यक्षसूत्रे वृत्तिकारस्य मतं भाष्यकारेण संसूचितम् अत एव भाष्यकारापेक्षया उपवर्षः प्राचीनः इति अवगम्यते । ब्रह्ममीमांसासूत्राणामपि उपवर्षेण व्याख्या कृता इति शङ्करभगवत्पादैः विरचिते सूत्रभाष्ये देवताधिकरणस्थया " वर्णा एव तु शब्दा इति भगवान् उपवर्षः" इत्यनया पङ्क्त्या विज्ञायते । "उपवर्षमतेन सूत्रत्रयमन्यथाकृत्वा व्याचष्टे भाष्यकारः" इति सिद्धान्तचन्द्रिकायाः पङ्क्त्या वृत्तिकारः उपवर्षः इति सिध्यति ।

भाष्यकारः

शबरस्वामी मीमांसासूत्राणां भाष्यकरः इति तावदविवादः । एतस्य कालविषये नास्ति किञ्चित् प्रमाणम् । अथापि जौकोबिमतानुसारम् ई.श २०० –५०० मध्यकालिकः इति सिध्यति । केचन उज्जयिनी अस्य स्थानमिति , केचन तक्षशिला इत्यामनन्ति । द्वादशाध्यायपर्यन्तम् अस्य भाष्यसौकर्यमुपलभ्यते ।

वार्तिककारः

मीमांसाशास्त्रे अतिमुख्यस्थानम् कुमारिलभट्टाः अलङ्कुर्वन्ति ।
आन्द्रोत्कलानां संयोगे पवित्रे जयमङ्गले ।
ग्रामे तस्मिन् महानद्यां भट्टाचार्यकुमारकः ॥
आन्द्रजातिः तैत्तरीयो मता चन्द्रगुणा सति ।
यज्ञेश्वरपिता तस्य .... (प्र. जी .वि)

कुमारिलानां पिता यज्ञेश्वर भट्टः , माता चन्द्रगुणा , अस्य तैत्तरीयशाखा , अस्य स्थानम् आन्द्रोत्कलयोः संयोगस्थाने विद्यमानायाः महानद्याः तीरे विद्यमानः जयमङ्गलग्रामः इति उपरितनेन वाक्येन बुध्यते । ई.पू.६२०–७०० एतेषां कालः इति कैश्चित्प्रमाणैः ऊह्यते । शङ्कराचार्याणामपेक्षया एते अष्टाचत्वारिंशद्वर्षाणि ज्येष्ठाः इत्यस्ति प्रसिद्धिः ।

कुमारिलानां श्लोकवार्तिकम् , तन्त्रवार्तिकम् , टुप्टीका इति ग्रन्थत्रयमुपलभ्यते । एते त्रयोऽपि भाष्यव्याख्यानाय निबद्धाः । प्रथमाध्यायस्य प्रथमपादस्य व्याख्या श्लोकवार्तिकमिति प्रसिद्धम् । प्रथमाध्यायस्य द्वितीयपादादारभ्य चतुर्थाध्यायपर्यन्तम् तन्त्रवार्तिकं नामकं भाष्यव्याख्यानमुपलभ्यते । आचतुर्थाद्द्वादशपर्यन्तं टुप्टीका नामिका व्याख्या उपपादिता । बृहट्टीका मध्यमटीका इति टीकाद्वयं कुमारिलैरेव

विरचितमित्यस्ति प्रसिद्धिः । परन्तु तदुभयं सम्प्रति नोपलभ्यते ।

प्रभाकरगुरुः

एते कुमारिलानां शिष्याः इत्यस्ति प्रसिद्धिः । एते ई.श.७०० शतके आसन्निति कैश्चैदितिहासज्ञैः ऊह्यते । बङ्गाले पाण्डुनामिकायां लिप्यां उपलब्धायां "बृहती" टीकायां एवं दृश्यते "दक्षिणकोसलेन्द्रस्य प्रधानामात्यस्य विभाकरात्मजस्य प्रभाकरमिश्रस्य कृतौ बृहत्यां नवमाध्यायः समाप्तः" इति अनेन अस्य स्थानं कोसलराज्यमिति विज्ञायते । बृहती तथा लघ्वी चेति टीकाद्वयं एतैः विरचितम् । बृहतीटीकायाः अपरं नाम निबन्धटीका इति । लघ्वीटीकायाः अपरं नाम विवरणटीका इति । सम्प्रति लघ्वी नोपलभ्यते ।

एवमेव अनेकेषां पण्डितानां अनेकाः व्याख्याः शास्त्रेऽस्मिन्नुपलभ्यन्ते । सा यथा–

क्र सं	ग्रन्थकर्तॄणां नामानि	ग्रन्थानां नामानि	ग्रन्थकर्तॄणां कालः
१	जैमिनिः	पूर्वमीमांसा सूत्राणि	–
२	उपवर्षः	सूत्रवृत्तिः	–
३	शबरस्वामी	भाष्यम्	२००
४	कुमारिल भट्टः	श्लोकवार्तिकम तन्त्रवार्तिकम् टुप्टीका बृहट्टीका मध्यमटीका	६२०–७००
५	प्रभाकरगुरुः	बृहती लघ्वी	६५०–७२०
६	मण्डनमिश्रः	विधिविवेकः भावनाविवेकः विभ्रमविवेकः मीमांसानुक्रमणिका स्फोटसिद्धिः	६८०–७५०
७	वाचस्पतिमिश्रः	न्यायकणिका तत्वबिन्दुः	८००–९००
८	पार्थसारतिमिश्रः	तन्त्ररन्तम् न्यायरत्नाकरः	१०५०–११२०

		न्यायरत्नमाला शास्त्रदीपिका	
९	मुरारिमिश्रः	त्रिपादीनीतिनयनम	१३००
१०	माधवाचार्यः	न्यायमालाविस्तरः	१२९७– १३८६
११	अप्पय्यदीक्षितः	विधिरसायनम्	१५२०– १५९३
१२	लौगाक्षिभास्करः	अर्थसंग्रहः	१६००
१३	आपदेवः	न्यायप्रकाशः	१५८०– १६५०
१४	खण्डदेवमिश्रः	भाट्टरहस्यम् भाट्टदीपिका भाट्टकौस्तुभः	१५७५– १६६५
१५	सर्वतन्त्रस्वतन्त्रश्री राघवेन्द्रतीर्थयतिसार्वभौमः	भाट्टसंग्रहः	१७००
१६	रामेश्वरसूरी	जैमिनिसूत्रवृत्तिः	१९००

॥ संक्षेपप्रकाशः ॥


आपस्तम्बश्रौतसूत्रम् .... (आप. श्रौ.)
तैत्तरीय आरण्यक .... (तै.आ)
भाट्टदीपिका ....(भा.दि)
जैमिनीयन्यायमाला विस्तर ....(जै.वि.न्या)
श्लोकवार्तिकम .... (श्लो.वा)
तैत्तरीयब्राह्मणम ....(तै.ब्रा)
शास्त्रदीपिका .... (शा.दि)
बौधायनीय गृह्यसूत्र .... (बौ.गृ)
आपस्तम्बधर्मसूत्रम् .... (आ.ध)
शाबरभाष्यम् .... (शा.भा)
बृहती ....(बृ.ति)
ताण्ड्यब्राह्मणम ....(तां.ब्रा)
तैतरीयसंहिता ....(तै.सं)
मैत्रायणीयसंहिता ....(मै.सं)
आपस्तम्बश्रौतसूत्रम् ....(आ.श्रौ)
तन्त्रवार्तिकम् ......(तं वा)
शतपथब्राह्मणम् .....(शत.ब्रा)
वाल्मीकिरामायणम् ...(वा.रा)

शब्दकल्पद्रुमः	.....(श.द्रु)
शतपथसंहिता	.......(श.सं)
जाबालस्मृतिः	.......(जा.स्मृ)
बौधायनीयधर्मसूत्रम्	.......(बौ.ध)
काठकसम्हिता	..........(का.सं)
षड्विंशब्राह्मणम्	........(षड्.ब्रा)
बौधायनीयश्रौतसूत्रम्.	.........(बौ.श्रौ)
जैमिनीयब्राह्मणम्	.........(जै.ब्रा)
मनुस्मृतिः	.........(मनु.स्मृ)
न्यायकोशः	.......(न्या.को)
भगवद्गीता	........(भ.गी)
प्रभावली व्याख्या	......(प्रभा.व्या)
ऋक्संहिता	..........(ऋ.सं)
भागवतपुराणम्	.... (भा.पु)
सिद्धान्तचन्द्रिका	.... (सि.चं)
वाचस्पत्यम्	........(वा.प)

॥ ग्रथने आदृताः आधारग्रन्थाः ॥

जैमिनीयसूत्रम्
शाबरभाष्यम्
श्लोकवार्तिकम्
भाट्टदीपिका
शास्त्रदीपिका
भाट्टरहस्यम्
विधिरसायनम्
तन्त्रवार्तिकम्
भाट्टकौस्तुभः
मीमांसान्यायप्रकाशः
अर्थसंग्रहः
मीमांसापरिभाषा
भाट्टसंग्रहः
मीमांसामण्डनमण्डिता
न्यायकोशः
वाचस्पत्यम्
कुतूहलवृत्तिः
बौधायनीयधर्मसूत्रम्


आपस्तम्बश्रौतसूत्रम्
जैमिनीयन्यायमालाविस्तरम्
प्रभावली व्याख्या
न्यायरत्नमाला
भावप्रकाशव्याख्या
मीमांसानुक्रमणिका
मीमांसा–उद्धरणकोशः



रामकृष्णनागवेणीनाम्नोः पुत्रत्वेन बागिनकट्टा इति नाम्ना प्रसिद्धे ग्रामे प्रापप्तजन्माऽहम् उमच्चगिस्थायां श्रीमातापाठशालायां वर्षपञ्चकं यावत् सुशिक्षितोऽस्मि । " पुराणमेकं नृषु कर्म कारणम् " इत्युक्तदिशा पूर्वकृतपुण्यवशेनैव श्रीमन्महाराजसंस्कृतमहाविद्यालयम् आप्तोऽहं तत्रस्थैः गुरुजनैः अनुगृहीतोऽस्मि । तत्रापि अज्ञमपि शिष्यत्वेन स्वीकृत्य अनुगृहितौ पूज्यस्थानीयौ गुरू नारायणरामचन्द्रमहाभागौ । अस्मिंश्च लेखने लेखनिस्थानीयोऽहमित्येव भावयामि । मया यल्लिखिताः शास्त्रीयाः पङ्क्तयः ताः सर्वाः गुरुवरयोः मुखात् श्रुता एव । यदि दोषोऽस्त्यस्मिन् स च स्वकरणगतदोषात् जात इति भावनीयः । अयञ्च ग्रन्थः शास्त्रर्णापाकरणाय मया व्यरचि ।

ग्रन्थेऽस्मिन् विद्यमानदोषान् परिमार्जयन्तः मार्गं दर्शितवन्तः अस्माकं श्रीमन्महारजसंस्कृतमहापाठशालायाः नव्यन्याय – शास्त्रसहप्राध्यापकाः विद्वांसः वि.गङ्गाधरभट्टमहाभागाः एवं कलाशालायाः अलङ्कारशास्त्रसहप्राध्यापकाः विद्वांसः एन्. आर्. मुरुळीधरमहाभागाः । अस्माकं कलाशालायाः गुरुजनाः प्रोत्साहेन ममोत्साहं संवर्धितवन्तः तेषां कृपादृष्ट्या कृतकृत्योऽहमित्येव भावयामि ।

ग्रन्थस्यास्य प्रकाशनेऽपेक्षितार्थव्यवस्थां प्रकल्पयन्तः श्रीमन्महाराजसंस्कृतमहापाठशालायाः प्राचार्याः छात्रहित – चिन्तकाः राज्योत्सवाद्यनेकपुरस्कारैः सम्मानिताः विद्वांसः डा ॥ प्रो ॥ भाष्यंस्वामिनः, सदासंस्कृतसेवायै बद्धकटयः सदासंस्कृतछात्रोत्साहसंवर्धनकार्यतत्पराः श्रीमन्तः वि.टि. अवधानिनः, उद्यमिनः सदासत्कार्यनिरताः देशविदेशेषु मानिताः श्रीमन्तः वसन्तराव् महाभागाः , संस्कृतानुरागिणः उद्यमिनः श्रीमन्तः श्रीनिवास. वि. भट्टमहाभागाश्च मां सार्थकं कृतवन्तः । एवं ये प्रत्यक्षेण परोक्षेण च मां सहकृतवन्तः तान् सर्वान् अभिवन्दे ।



विद्वान् ॥ विघ्नेश्वर भट्टः
नेलेमाव्
बागिनकट्टा